[illegible], [illegible], Vasant Tilak
Parameshwar tantresu (1-15)
परमेश्वर तंत्रेषु (पटल 1-15)
Sanskrit
Paper – Handwritten
N. A.
145 Folio
10.8" x 5.5"
Incomplete

ई० १५६२

॥ अथ पारमेश्वरतंत्रेषु लिख्यते ॥

श्रीगणपतयनमः श्रीसांबायनमः अथपारमेश्वरतंत्रलिख्यते
वसंततिलकवृत्तं वंदेगौरींद्रतनयाद्विरदाननाग्नि भूनंदिभृंगीरिटि
सेवितपादपद्मं पंचाननंफणिशशीभतरक्षचर्मभूषंमहेशंनिशंशिरसा
गीरीशं १ पाशांकुशेष्टदविषाणकराग्नबीज पूरोज्वलंनरुणसूर्यजय
प्रकाशं कोटिरकोटिशशिखमुमातनुजं वंदेगणेंद्रमनिशंवरदान
दक्षं २ कैलासशिखरेरम्यसिद्धगंधर्वसेविते सर्वकल्याणनिल
येपुण्यशंकरमंदिरे एकदारहसिभ्रमणपार्वतीपरमेश्वरं सर्वलोको

प्रकारायनमस्कृत्येवमब्रवीत् ४ पार्वत्युवाच देवदेवमहादेव चं
द्रशेखरधूर्जटे मतभेदस्वरूपंमेवदत्वंनसर्वशः ५ मतानिकति
भेदानिलक्षणंतस्यतस्यकिं आचारश्चकथंतत्रप्रायश्चित्तंफलंच
पि ६ ईश्वरउवाच शृणुदेविप्रवक्ष्यामि मतानांलक्षणादिकं
यत्तुज्ञात्वानिवृत्तिंयातिशिवः संजायतेस्वयं ७ आदौतुसौगतम
तंतच्चपंचविधंप्रिये बौद्धसौगतचार्वाकजैनाईतविभागतः
८ तेषामिदंमाहामुख्यंमतंसाधारणंप्रिये तारंतुतारतारेस्वाहेति

शुन्यार्थकोमनुः ९ अथवैदिकमीशानिमतंयद्देदसंमतंमंत्र
स्तु ब्रह्मगायत्रीसर्वसाधारणःप्रिये १० ततोधिकंसौरमतंगा
यत्रीसौरलक्षणा तच्चपंचविधंदेविपंचभेदान्निशामय ११
वैकर्तनंतथादित्यंपौष्णंमार्तंडसंज्ञितं सौरंसर्वोत्तमंतत्रयत्तु
सूर्याधिदैवतं १२ ततोधिकंमहादेविमतंवैष्णवमुत्तमं त
द्भेदमपिवक्ष्यामितच्चपंचविधंमतं १३ गोपालनारसिंहं
चरामकृष्णात्मकंपरं नारायणमितीशानिगायत्रीवैष्णवीतथा
१४

२

अथवक्ष्येगिरिसूते मतं ममहत्तरं । शैवं सप्तविधं पुण्यं वीरशैवा
दिभेदतः १५ वीरशैवं तथानादिशैवमादिपरं ततः अनुशै
वं महाशैवं योगशैवं तु षष्ठमं १६ सप्तमं ज्ञानशैवाख्यं तत्र सर्वो
त्तमोत्तमं वीरशैवमितीशानि तदंगानीतराणितु १७ गाणा
पत्यं वीरभद्रं भैरवं शरभाभिधं । नांदिकेशं च कौमारं पैशाचमि
ति सप्तधा १८ अष्टकोटिमहाभेदं गाणपत्यमतं प्रिये सप्तधा
वीरभद्राख्यं भैरवं चाष्टधोदितं १९ शरभं च पंचविधं नांदिके

२

झं त्रिधोदितं । कौमारमिति पैशाचं मतंतु त्रिविधं प्रिये २० सौ
गतादीनि यावंति वैष्णवांतमतानितु । यच्च शैवमममतं सर्वेषामु
त्तमोत्तमं २१ तत्तु षड्विधं प्रोक्तं षड्दर्शनविभेदतः वीरशैवं वै
ष्णवं च शाक्तं सौरं विनायकं २२ कापालमिति विज्ञेयं दर्शनिश
ड्वहि । तत्र तंत्रोक्तमार्गेण तत्कर्म समाचरेत् २३ शैवं पाशु
पतं सोमं लाकुलं च चतुर्विधं । शैवभेदमिति ज्ञेयं संकरं न समा
चरेत् २४ अनादिशैवः प्रथम आदिशैवो द्वितीयकः तृतीय

६ स्तु महाशैवश्चतुर्थो ह्यनुशैवकः २५ पंचमोवांतरंशैवोयोग
शैवस्तु षष्टकः सप्तमो वीरशैवाख्यस्तत्तत्कर्म समारभेत् २६
तत्तदागमकर्माणितत्तद्दैवंनामिश्रयेत् गोपालंपांचरात्रंचना
रसिंहं च वैष्णवं २७ नारायणं पंचविधं संकरं न समाचरेत्
नित्यानित्याशाबराख्या शक्तिश्चेतिचतुर्विधा २८ शाक्तभेदमि
तिज्ञेयं संकरं न समाचरेत् ब्रह्मेंद्रः सावनः सूर्य इति सौरश्चतु
र्विधः २९ तस्मिन् तस्मिन् यथाप्रोक्तं तत्तद्दैवं नामिश्रयेत् अ ६

ह्ये श्चार्वाकबौद्धश्चजिनश्चेतिचतुर्विधं ३० वैनायकमितिज्ञेयं
संकरंनसमाचरेत् निरीश्वरंसेश्वरंचकापालंभैरवंतथा
३१ चतुर्विधंतुकापालंसंकरंनसमाचरेत् अन्नादौवीरशैवा
ख्यं तंत्राणामुत्तमोत्तमं ३२ तत्रमंत्रोमहादेवि शैवपंचाक्ष
रोमतः तदुद्धारंप्रवक्ष्यामिशृणुशैलकुमारिके ३३ जविपूर्व
मरुत्पूर्वसमन्वितः पार्श्वमक्षिसमायुक्तं वरुणस्थंधनुःप्रिये
३४ वह्निपूर्वसमन्वितः ततोशिवमंत्रःसाक्षान्मदात्मकः सर्वे

५ षामपिशैवानांसर्वसाधारणोमनुः २५ देव्युवाच । उक्तान्येता
निदेवेश सर्वाणिच समानिवा । तारतम्येनवातत्र किंमतंसर्वशेख
रं २६ नोक्तंशाक्तमतंदेवह्युत्तमंवाधमंसमं । तदद्यकथयस्वा
मिन् यत्तुसर्वोत्तमोत्तमं २७ ईश्वरउवाच । सर्वाणिचमाहादेवि
मतानिचमहत्यपि प्राप्यमेकंफलंतेषांविशेषस्तत्रवक्ष्यते २८
विताया समहायुक्तिन साध्यान्यन्यानिपार्वति । महाफलंशुभकरं
शैवमेवनसंशयः २९ तत्रवक्ष्येशिवेवीरशैवंसर्वोत्तमोत्तमं । ना ५

न्यस्यतद्भवेद्योगंज्ञात्वेयंसर्वसमतं ४० वीरशैवमतंसद्योभोगमोक्षै
कसाधनं सर्वोत्तमंममम्मतंयतःसर्वोत्तमोस्म्यहं ४१ नवीरशैवस
दृशंमतमस्तिजगत्त्रये । सर्वभोगप्रदंपुण्यंशिवसायुज्यदायकं ४२
यथामत्सदृशोनास्तिपुमुत्तुरूषाणांत्वयासमा । स्त्रियाणांतथावीरशैवस
दृशंनास्तिवैमतं ४३ अपिपापशतंकृत्वाज्ञानतोज्ञानतोपिवा । वी
रशैवमतंप्राप्यशिवएवनसंशयः ४४ नतस्यास्तिभयंपापान्नाधि
क्यान्तुपुण्यकर्मणः स्वयंहिपुण्यपापानांनिर्नेताचनियामकः ४५

६

येवीरशैवेदेवदिक्षिताशिवयोगिनः नानदृष्ट्वैवपलायंतेदूरतो
यमकिंकराः ४६ सभस्मरुद्राक्षतनुंसलिंगंशिवयोगिनं दृष्ट्वा
सद्यो विमुच्यंते पापिनोपिनसंशयः ४७ यस्यभस्मललाटेस्ति
कंटेलिंगंमदात्मकं रुद्राक्षधारणं देहे सोहं देवि नसंशयः ४८
यइच्छन्ममसारूप्यं सोर्चयेच्छिवयोगिनं यइच्छेद्रौरवंघोरं सनि
देच्छिवयोगिनं ४९ नित्यपश्यद्वीरशैवदीक्षितं शिवयोगिनं
यस्यकंटगतोहं वैसतस्मादुत्तमः प्रिये ५० यादृशीभावनाका

६

योमयित्वयिशिवेतथा । तथैवकार्यादेवीशैवदिक्षितउत्तमे ९१ त
स्यपूजाममशिवेतन्निंदाचममैवहि । यद्यस्तिमयिसद्भक्तिरर्चये
च्छिवयोगिनः तत्कैलासपरंविद्धितत्रकाशीशिवाप्यहं ९२
ममयोधारयेल्लिंगंयशोक्तंगुरुणाशिवे चांडालस्पृष्टदोषोपि
स्मरतोनश्यतिक्षणात् ९४ नतस्यजातिभेदोस्तिनशुच्यशुचि
कल्पना नस्पृष्टिर्नापिवाशुद्धिःसर्वंशिवमयंततः ९५ भुक्त्वा
वशिष्टपात्रंयत्तदुच्छिष्टधियाशिवे । क्षालयेच्छिवयोगीयःसया

८ तिनरकंध्रुवं ५६ नस्पृष्टिर्नरजोदोषंनस्त्रीबालादिकस्मना नज
न्ममरणेशौचंनस्नानादिर्विधियता ५७ ब्राह्मणक्षत्रीयावैश्याःशु
द्रायेचान्यजातयः लिंगधारणमात्रेणशिवएवनसंशयः ५८ स्त्रि
योबालास्तथावृद्धाःखंजाःकुब्जांधपंगवः उन्मत्ताबधिराकुणाःश
ठधूर्ताश्चवंचकाः ५९ चोराजारास्तथावेश्याआचांडालानसंभ-
वाः मल्लिंगधारणादेवमद्रूपाएवतेशिवे ६० नबालवृद्धभेदो
स्तिनमस्कारादिपूजने सर्वेपिवंदनीयाहिविधवापुष्पिणीमुखाः ७
६१

यस्यास्तिभक्तिरीशानि वीरशैवमताश्रये भक्तिमात्रपवित्राहि
सर्वएकाधिकारिणः ६२ देव्युवाच जयशंकरसर्वेशसर्वज्ञसक
लोत्तम मतेतुवीरपूर्वत्वे किंप्रमाणमिहोच्यतां ६३ योगिकंरूढी
कंवेदमुपचारोपिवाप्रभो तद्ब्रुकथयेशाननास्तिनान्यस्यचेदृशं
६४ ईश्वरउवाच साधुपृष्टंत्वयादेविसर्वलोकहितंत्विदं महारह
स्यमतत्तेवक्ष्येमोहवशार्दितः ६५ वीरत्वनामविश्वेशितुरीयोयत्र
यत्नवे गुरुत्क्रमार्गनिरतामत्तेवीरपदाभिदे ६६ सर्वेपिवीरादेवे

९ शितुरीयायत्रयत्रये किंतुमशैवभेदायावीरशैवसउच्यते ६७
अन्यत्रकर्मबाहुल्यादाचारस्यव्यतिक्रमात् नचित्तशुद्धिलाभश्च
भेदः सद्भावतः सुखं ६८ अत्रवक्ष्येविशेषंते लिंगधारणवैभवा
त् भक्तिमात्रेणकल्याणिसुखंदुःखंबुधिंतरेत् ६९ प्रवेशमा
त्रेणमत्तेममशैवेमतोत्तमे अनायासेनसुखलिंगधारणवैभ
वात् ७० अन्यत्रनास्तिमल्लिंगधारणंमतवर्ति शैवःसएवकु
र्वीतलिंगधारणमीश्वरि ७१ मतांतरस्थोयोमूढः कुर्यान्मल्लिं ९

गधारणं सजीवन्नेवचांडालो मृतो नरकमश्नुते ७२ योविना
गुरुकारुण्यमिच्छया लिंगधारणं सजीविन्नेवचांडालो मृतो नर
कमश्नुते ७३ योन्यधर्मः परंधर्ममाचरदिच्छयान्वितः सजीव
न्नेवचांडालो मृतो नरकमश्नुते ७४ यदीभक्तिर्दृढदेवीम
मलिंगस्य धारणे शिवयोगिनमाश्रियतं गुरुं शिवमर्चयेत् ७५
शिवदीक्षां विना देवियः कुर्याल्लिंगधारणं सयाति नरकं घोरं यस्य
चेत्तद्भक्तितः ७६ विनाविधानमीशानि नकुर्याल्लिंगधारणं

१ कृतंचेदकृतंविध्विनतच्छैवमतंभवेत् ७७ लिंगधारणंमात्रेण
शिवत्वप्राप्तिरेवहि शैवंमममतंदेवि सद्योमुक्तिविधायकं ७८
तस्माछैवमतंसर्वमतानामुत्तमोत्तमं ममस्वरूपंदेवेसिमल्लिं
गस्यचधारणात् ७९ विनानानुग्रहंतेषांममशैवमतेशिवे
भक्तिःसंपद्यतेक्वापितत्पुनर्भवभाजनाः ८० सकृल्लिङ्गस्यच
नरोगतेषुबहुजन्मसु ममशैवमतेदेविसोऽहमेवनसंशयः
८१ यथानदीनांसर्वासांपुण्याभागीरथीशिवे यथैवभवतीसर्व १

योषितां पुरुषोऽप्यहं ८२ यथैव काशी क्षेत्राणां तीर्थेषु मणिकर्णिका
मम पंचाक्षरी मंत्रः सर्वमंत्रेषु ये मथा ८३ यथैव सर्वलोकेषु केला
सस्थानमावयोः तथा शैवमतं देवि विद्धि सर्वोत्तमोत्तमं ८४ म
म सर्वोत्तमत्वेन मत्सृष्टत्वात्परस्य च तदेव तारतम्यं ते मतेमम परं
त्वतु ८५ यथावर्धयते राजा भृत्यं कर्मानुसारतः तारतम्यपरं द
त्वा तथैवाहं मते मम ८६ विशेषं तत्र वक्ष्यामि रहस्यं गोप्यतां त्वया
न प्रकाशय कुत्रापि विना भक्तं सुलक्षणं ८७ देवालयादिषु यथावि

१० त्रादिषुयथागृहे दृश्यतेचाकृतिर्यस्यतज्ज्ञानंजायतेस्फुटं ८८
एवंखमन्त्राद्न्यत्रसर्वपापैःप्रमुच्यते लिंगस्यदर्शनाद्देविममज्ञा
नंप्रजायते ८९ गतेषुबहुसंख्येषुदुःखरूपेषुजन्मसुमत्कारू
प्येनतश्यांतेजायतेलिंगदर्शनं ९० यदेतमितिज्ञानातिलिं
गंममममहेश्वरि मज्ञानाद्दर्शनासयोलिंगस्यचसोस्म्यहं ९
एवंहिममहिमादेवीममलिंगस्यकिंपुनः धृतेतुतस्मिन्स्वत
नौसर्वलिंगमयीतनुः ९२ स्त्रीनार्थकमपिवीशियत्तल्लिंग १०

मयमिश्रेतच्छरीरं तस्य धारणात् १३ देव्युवाच वृषध्वज
वृषारूढ विरूपाक्ष विषादन नतेकुर्वंति किं सर्वे लिंगधारण
मिश्वर १४ ईश्वर उवाच कथं भविष्यति शिवं विना मकरूणां
नृणां कर्मपूरितदृष्टीनां मन्माया मोहितात्मनां १५ तदनुष्ठा
नमात्रेण विधूयाखिलबंधनं सर्वकल्याणनिलयं ममसायु
ज्यमेतिसः १६ ज्ञानतोज्ञानतो वापि शक्त्याशक्त्यादिनापि
वा यन्न्यूनमतिरिक्तं वा वस्यात्रय युतोपि वा १७ त्रिगुणायां

११ तिसायुज्यंशैवस्यशिवयोगिनः सकृल्लिंगार्चनेनैवयत्तद्रूपंम
हेश्वरि ९८ सर्वत्रममदर्शित्वंभक्तिरेकांतरूपिणि मन्मतस्यचम
त्प्राप्त्येद्वयमेवहिसाधनं ९९ नपुष्पिणीयजेत्पूजांनकांताशुचि-
स्वपि यदेवपूजयेल्लिंगंतदानुग्रहकोप्यहं १०० स्मरणात्कीर्त
नाद्देविममलिंगस्यधारणात् आनायासेनातिशयंफलंस्यादुत्त
मोत्तमं १०१ नमेस्तियस्मिन्कारुण्यंनतस्यात्ररुचिर्भवेत यदे
वस्यादत्ररुचिस्तदामुक्तोनसंशयः २ अतोममरहस्यंहिमतंमे ११

तन्महत्तरं शैवं पाशुपतंचेतियदेकं नामभेदतः ३ तत्रसप्त
विधेष्वेषु वीरशैवं महत्तरं शैवे वीरत्वमात्रेण किंपुनर्लिंगधारणा
त् ४ यथैव दर्शनाल्लोके शिखरस्य शिवालये नश्यंत्यनेकपापा
नि शिवत्वं ज्ञानसंभवात् ५ तथैव दर्शनाल्लिंगधारिणः शिवयो
गिनः सर्व्वानश्यंति पापानि तमः सूर्योदयेयथा ६ अतएवमहा
देवीगुप्तं मतमिदं कलौ मन्मत्तज्ञानमात्रेण मुच्येयुरपि पापिनः
७ लाभः शैवमतस्यैको वीरशैव प्रवर्तनं भक्तिर्भूतदयाचेतिम

१२ कैवल्यंचतुर्विधं ८ यदिनास्त्यधिकंमत्तस्तदास्यानन्यमत्तात्परं
यदिस्यान्मत्परंदेवीमत्स्वातंत्र्यंकुतस्तदा ९ इयंतेकथितंदेवी
मतभेदमतःपरं तारतम्यफलंचापिकिंभूयःश्रोतुमिच्छसि
११० इतिश्रीपारमेश्वरतंत्रेशिवाद्वैतसिद्धांतेवीरशैवदिक्षाप्र
करणेमतभेदनिरूपणंनामप्रथमपटलः १ श्रीसांबार्पण
मस्तुः

१२

श्रीगुरुभ्योनमः त्रियंबक नमस्तेस्तु त्रिपुरघ्नयमांतक वदमेकरुणासिं
धो लिंगधारणलक्षणं १ दिक्षादिक्रमशः सर्वसज्जिकादिगुणाधिकं
शिवाग्निजननंचापि सर्वविस्तरतः प्रभो २ ईश्वरउवाच शृणुदेविप्रव-
क्ष्यामि लिंगानांभेदमादितः दिक्षायाः सज्जिकादेश्च सर्वनिगदितोमम
३ ममलिंगमिदंसर्वंजगत्स्थावरजंगमं ममलिंगमिदंविध्धि पाषाणादि
विनिर्मितं ४ नादेयंशैलसंभूतंपुण्यक्षेत्रसमुद्भवं गंगोद्भवंसागर-
जंलिंगंतन्ममसमतं ५ यल्लिंगेविशिवनाभाख्यंलिंगंतत्परमुत्तमं य

२ दीयते हि गुरुणा लिंगं सर्वोत्तमोत्तमं ६ काम्यान्यन्यानि लिंगानि लक्षदि
ष्टार्थदानि हि सौवर्णपारदादीनि स्थूलं स्थूलं प्रशस्यते ७ क्रमुकाकृ
तिमारभ्य यावदिच्छास्ति धारणे उत्तरादुत्तरा श्रेष्ठं मम लिंगं महेश्वरि ८
पारदं सर्वकामाय सौवर्णं वित्तकामिनः रजतं तु प्रजाकामि ताम्रं शत्रुवि
नाशनं ९ त्रपुजं रोगनाशाय शीसकं पापनाशनं स्फाटिकं ज्ञानदं पुण्यं
रुद्राक्षं मोक्षदायकं १० दारुजं सर्वनाशाय कांसं रोगार्तिदायकं श्री
शैलजं महादेवि ह्यैहिकामुष्मिकप्रदं ११ सर्वोत्तमोत्तमं लिंगं सर्वाभिष्टा २

र्थदायकं यदुक्तं गुरुणा देवि लिंगं तदहमेव हि १२ बदरिफलमानं तु कृतं धर्माभिवृद्धिदं कसुकीफलमानं तु धत्तुः सर्वार्थदायकं १३ जंबीरफलमानं तु सर्वकामार्थदायकं ततोधिकं प्रियं यावच्चतुर्वर्गफलप्रदं १४ न प्रमाणं तदं तस्य शिवनाभस्य पार्वति यदुक्तं गुरुणा नातस्य सर्वलक्षणलक्षितं १५ सर्वसाधारणं देवि सर्वसौभाग्यदायकं सर्वसिद्धिकरं लिंगं यच्च पाषाणनिर्मितं १६ सर्वोत्तमोत्तमं लिंगं यच्च श्रीशैलजं शिवे दोषाश्च बहवः संति टंक्यादिनिधराऽसजे १७ अन्यलिंगे

२ षुसर्वेषुनैवपाशाणसंभवे ज्ञातके मृतकाशौचेमलमुत्रविसर्जने १८
स्नावाशुद्धोउद्योगेरणेनिद्रादिषुप्रिये कर्मणामनसावाचाज्ञा१ स्वल्प
कृषुस्त्रिषु १९ नलिंगमुसृजेत्कापिप्राणैःकंठगतैरपि नपूजापिप
रियाज्मा क्वेपिकुलनायके २० नसकृत्स्मरणंवापिममलिंगस्यस
दुशः तेषेकतममादाय लिंगंस्वाभिमतंशिवे २१ धारयेदात्मता
दात्म्यंप्राणलिंगंममेतितत् अथकुर्यान्महादेवीसज्जाकारव्यंतदा
लयं २२ यथास्थिरस्यलिंगस्यतद्वदेवचरस्यच स्थिरलिंगालयंदेवि २

प्रसिद्धं इष्टलक्षणं २३ ज्ञानास्यतत्स्वरूपं चरलिंगस्यशांकरि ल
क्षणंपूजनविधिमाचारंलिंगधारिणां २४ क्रमेणशृणुतत्सर्वंतारतम्य
फलंशिवे स्थिरलिंगार्चकालोकेनशुद्धापंक्तिकर्मसु २५ धृतलिं
गार्चकासर्वेपावनाःपंक्तिकर्मसु पृथकस्थवाच्चलिंगस्यस्वदेह
स्याम्यशुचिर्जं २६ स्पृष्टुनयोग्यतालिंगंनचैवंशिवयोगिनः धृ
तलिंगशरिरत्वासदातुज्ञानसंभवात् २७ शुचिरेवसदातस्यन
शुचिर्नैवचाशुचिः गच्छन्तिष्टन्स्वपन्भुंजन्जाग्रन्नपिहस

२ न्नपि २८ खादन्पिबन्शयानो वा लिंगपूजां समाचरेत् यथोप
विश्यपिठदो शिवयोगी प्रवर्त्तते २९ तथोपविष्टये वासो धावन्पूजि·
तवानपि नकायक्लेशसहनं नोपवासादिपिडनं ३० यथेछामपि
भुंजानो भोगाल्लिंगं समर्चयेत् दयाभूतेषु मद्भक्तिः सर्वत्र ममदर्शनं
३१ मल्लिंगधारणं नित्यं मुक्तिरेषा चतुर्विधा तस्मात्सोऽभ्यमिशग
नितारतम्येन योगिनां ३२ मतस्य ममचान्यस्य मन्मते लिंगधार
णात् तस्य लिंगस्य विभ्वे शिवं कुर्याच्छिवालयं ३३ पंचसूत्रो २

थलिंगस्य यावत्पूर्णं तथा भवेत् सौवर्णमुत्तमं देवि यदि शक्तिस्तथा
चरेत् २४ राजतं पित्तलं ताम्रं नवकांस्येन कारयेत् सीसेणत्रपुणा
देवि यदि शक्तिस्तथा चरेत् ३४ राजतं तांतवीपाटिका पिवा २५
एतेष्वन्यतमं निःसंनान्यं कुर्याद्विपद्यपि परित्यज्यापि यत्नेन प्राण
मानधनादिकं २६ संरक्षणीयं गिरिजे लिंगमेव न संशयः सं
भावितेन द्रव्येण विना तं तु पटोद्भवं २७ कर्कटाद्या तीरन्याय
थाकामफलप्रदा पंचसूत्रप्रमाणेन सज्जिका लिंगरूपिणी २८

६ तादृशस्य च लिंगस्य भोगमोक्षैकसाधनी भोगस्वर्गापवर्गीयममनंदी
श्वराकृतिः ३९ भोगमोक्षैकफलदा सञ्जिकार्कफलाकृतिः अयुरा
रोग्यफलदा यासा चुतफलाकृतिः ४० आयुष्मत्पुत्रसौभाग्यफल
दामोदककृतिः ऐश्वर्यविजयायुष्यतेजःप्रज्ञाविलासकृत् ४१ स
ञ्जिकाशिवलिंगस्य बिल्वीफलसमाकृतिः शिवलिंगाकृतिः सञ्जाभो
गमोक्षैकसाधनी ४२ यद्यदिष्टतमं देवि भूषणं मणिकांचनं तद्देवस
ञ्जिकां कृत्वा सर्वकामं समश्नुते ४३ चतुरस्रपंकजाभं वर्तुलं बिंबको ६

पमं यथासंदर्शितं देवि गुरुणा तत्तदाचरेत् ४४ एकद्वारकपाटाद्यपा
द्भित्रयशोभिनी सनद्ध गुणसंबध्याद्दढासंतानशोभिनी ४५॥ सौव
र्णः स्याच्चद्वीगुणः सर्वसौभाग्यदायकः राजतः पुत्रकीर्तिः स्यात्ताम्रश्चे
धनधान्यकृत् ४६ पैतलस्सर्वभोगाय कांस्यं कल्मषनाशनं त्रपु
सीसमयो वापि सर्वाभिष्टफलप्रदः ४७ दारिद्र्यायच संविद्धि पट
जः सर्वदुःखकृत् कार्पटः सर्वभोगाय तांतवी सर्वकामदः ४८ शुक्लो
ज्ञानप्रदस्तत्र रक्तो वश्यकरो गुणः श्यामः शत्रुभयंकरः पीतः पुत्रप्र

९ दायकः ४९ चित्रोविचित्रफलदः स्फुटदृश्छेदवर्जितः अग्रंथिरूप
पः स्याद्दाभ्याकंटमध्यगः ५० यावदिच्छा भवेद्देवि सञ्जिका गुणउत्त
मः तावदेव प्रकुर्वित साञ्जिका गुणमीश्वरी ५१ यासञ्जिभवद्रूपा
मद्रूपा या गुणः शिवे उभयोरावयोर्योगाज्जगदेतच्चराचरं ५२
पूंरूपमखिलं देवि ममरूपं न संशयः स्त्रीरूपमखिलं देवि तवरूपं
न संशयः ५३ मयाविना क्वचिन्नास्ति तवरूपं तथा मम तदेवरूप
लाभाय गुणयोगः प्रकिर्त्तितः ५४ शिवस्यैव भवेद्दारमेकं स्याद्द ९

क्रमेवहि सार्गत्वंतिर्यगरंसर्वमेकात्मकं शिवे ५५ यस्यद्वारयुगे
देवि गौरी कात्यायनीउमे पार्श्वयोः शांकरी रौद्रीभद्राकाल्युपरिस्व
धः ५६ यस्याःपादत्रयं धर्मकामार्थात्मकमीश्वरि यस्यामदास्त
कगुणाभोगमोक्षफलात्मकः ५७ गुणस्याग्रद्वयोरेवसंबंधोदोस्त
वर्त्तुला पञ्चकुडमलरूसद्रूपोग्रान्तेज्ञानक्रियेतिच ५८ तदुपर्यंक
मीशानिचित्रमेकंस्वरूपकं आत्मपूर्वाग्रमाकुंच्यह्यात्माग्रमवर्कुं
चयेत् ५९ पार्श्वद्वयाग्रसंयोज्ययथोक्तंगुरुणाततः उक्तमेवंम·

६ यालिंगसाज्जिकागुणलक्षणं ६० तद्धारणक्रमं वक्ष्ये दीक्षापूर्वं सवि
स्तरं यस्तु मत्करुणापात्रं चरमं जन्म यस्य वा ६१ तस्यैव जायते भ
क्तिर्मम लिंगस्य धारणे निर्विष्टविषयः शांतः सर्वत्र समदर्शनः ६२
मुमुक्षुरीश्वरे भक्तः श्रीगुरुं शिवमाश्रयेत् सर्वलक्षणसंपन्नं सर्वज्ञं
सर्वसंमतं ६३ सदाचाररतं शुद्धं शिवभक्तमलोलुपं यथार्थवा
दिनं शांतं द्वेषासूयाविवर्जितं ६४ विदिताखिलशास्त्रार्थमिंगित
ज्ञमनाकुलं अनाथातुरमासज्ञमकामुकमवंचकं ६५ वाग्मिनं ६

शिवतत्वार्थबोधकं हृष्टमानसं एतादृशगुणोपेतमुपेयात् गुरुमीश्वरं
६६ रिक्तहस्तेन नोपेयात् उपसर्पेत् गुरुं शुचिः नमस्कृत्य विधानेन सा
ष्टांगं भक्तिपूर्वकं ६७ कृतांजलिपुरः स्थित्वा स्तुत्वा विज्ञापयेत्ततः
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ६८ देहि शिष्याय मे वीरशै
व दीक्षामभिष्टदां इति पृष्टोथ सिष्येण यदि दातुमना गुरुः ६९ विशो
ध्य वर्षत्रितयमथ तं दीक्षयेद्बुधः कुशलं श्रीगुरोर्भक्तं श्रीगुरोः प्रिय
कारिणं ७० कर्मणा मनसा वाचाप्यछायेवानुचरं सदा गुरुमंत्रास्तदेवे

७ षु तथैवासनमुद्रयोः ७१ अभेदभावनाधीरं सत्यवादिनमास्तिकं प्राणा
र्थमानवसुभिः मनोवाक्कायकर्मभिः ७२ सर्वदा सर्वभावेन गुरुशुश्रुष
णेरतं अप्रमत्तमुदारांगं दृढचित्तमनामयं ७३ असत्यवादरहितमवं
चकमदुष्टहृदं आनार्थलोभमर्थाढ्यं मृदुसंभाषणप्रियं ७४ इत्यादिगु
णसंपन्नमथतं दीक्षयेच्छिवे हस्तमस्तकसंयोगमात्रेरहंकरं स्मरन्
७५ अस्तु तिष्ठ शिवाज्ञेति ह्यंगीकुर्याद्गुरुस्ततः यः सदा गुरुसेवाया
मप्रमत्तो जितेंद्रियः ७६ भुक्तिमुक्तिफलप्राप्त्यै सर्वदेशाधियागुरुं ७

नलंघयेत् गुरोः छायामात्मछायां तथा गुरो ७७ प्रसारयेन्न यत्नेन शि
ष्यो भूष्णुः कदाचन उच्चासनं न सेवेत न्नोच्चभूयात्तदग्रतः ७८
न चेष्टयद्यथात्मेच्छं न्यान्यगोष्टिं समाश्रयेत् न गुरोरग्रतो गच्छेन्न स्वपे
द्गुरुसंनिधौ ७९ सह श्रीगुरुणा शिष्यो न कुर्यात् क्रयविक्रयं नोच्चै
हे सन्न प्रलपन्नोपविश्येत्तदग्रतः ८० मुखावलोकी सेवेत स्वप्र
सन्नमना मुखः कष्टेपि नात्मनः क्लेशं तदग्रे संप्रकाशयेत् ८१
स्पृ शय्याचासनवस्त्रादि यत्नसुष्टं तु पूजयेत् पादुकावाहनादीनि नापि

८

सर्व्यं व्रजेद्गुरोः ८२ समर्प्यगुरवेश्रीयाद्यद्यदिष्टंतथात्मनः भावये
द्धि गुरोरूपंजगदेतच्चराचरं ८३ संस्मरेच्छ्रीगुरोर्नामजाग्रत्स्वप्न
सुषुप्तिषु कर्तव्येतुनमस्कारेज्येष्टपुज्यशिवादिषु ८४ प्रणमेद्यत्र
कुत्रापिगुरुमेवहृदिस्मरन् इत्यादिगुणसंपन्नंस्वभक्तितः ८५
परि ग्रह्यगुरुःषिष्यंशिवदिक्षासुयोजयेत् ईषोर्जेमार्गशीर्षेषुतप
स्यपितपस्यके ८६ माधवेशुक्लपक्षेतुपुर्णा च्चविशेषतः जया
सुशिवदिक्षायाउत्तरोत्तरवृधिकृत् ८७ पंचम्यांतुप्रजावृध्धिर्दशम्यां

८

पशुवृद्धिकृत् पौर्णमास्यां तु दीक्षा च चतुर्वर्गफलप्रदा ८८ द्वाद
श्यां च चतुर्दश्यां नवम्यामष्टमीदिने शिवरात्र्याममायां च कार्तिके
सोमवासरे ८९ शुक्रार्कभौमवारेषु मघार्द्रारेवतीषु च श्रोणाश्विनी
भरण्यग्निस्वातिमूलेंद्रविषु ९० फाल्गुनीशततारासु स्वजन्म-
र्क्षे गुरोस्तु वा वैधृतिं च व्यतीपातमतिगंडं च गंडकं ९१ शूलव्या
घातमितरे वर्जयित्वाखिलाः शुभाः भद्रं वा करणं देवि किंस्तुघ्नमपि
बालकं ९२ मुक्त्वैतानि गिरिजे यथायोग्यं समाचरेत् सर्वलक्ष

णसंपन्ने दिने कुर्यात्तथापि वा १३ दोषाल्पत्वं गुणाधिक्यं वीक्ष्य दी
क्षां प्रयोजयेत् अपूर्वदीक्षाकरणे विधिरेष उदाहृतः १४ यद्यवांत
रदीक्षा चेत् सर्वकालो न संशयः यदि नश्येत् प्रमादेन लिंगमन्यद्य
थाविधि १५ दीक्षापूर्वं प्रकर्तव्यं यदि सज्जिकया सह स्फुटिते
तु क्वचिल्लिंगे दीक्षां सद्यः समाचरेत् १६ मध्यभेदे महादेवि तद्ग
गाधाजले क्षिपेत् एकरात्रिविधानेन विना होमाभिषेचनं १७
संस्कृत्य धारयेल्लिंगं न दोषस्तत्र विद्यते अथ चेत्सज्जिका नाशास्त

दान्यांकारयेत्पुनः ९८ प्राणस्थापनमारभ्य शिष्टं संस्कारमाचरेत्
गुणनाशे पुनर्देवि गुणमन्यं प्रयोजयेत् ९९ सज्जिका गुणलिंगंदोय
न्नष्टं तत्तथाचरेत् यल्लिंगमादिलो लब्धं यावज्जिवं तदेव हि १००
नान्यल्लिंगं भवेन्मध्ये यदि स्यात्स तु पातकी सज्जिका गुणवस्त्रादि
यद्दत्तं गुरुणा ततः १ यावज्जिवं तदेव स्यादन्यथा याति रौरवं यल्लिं
गं तदेव हि २ मध्ये नष्टमादेर्नदेहं स काशिवं व्रजेत् अतिक्रम्य
गुरुं यस्तु गुरुमन्यं समाश्रयेत् ३ सजीवन्नेव चांडालो मृतो नरक

१० मश्नुते गुरुभक्त्यामहेशानिसदामल्लिंगधारणात् ४ इहामुत्र
सुखंतस्यसौभाग्यंचपदेपदे सज्जिकादिक्रमंचाथलिंगभेदंविशेषतः
५ उक्तंतवाखिलंदेवि किंभूयःश्रोतुमिच्छसि १०६ इतिश्रीपारमे
श्वरतंत्रेशिवाद्वैतसिद्धांतेवीरशैवदीक्षाप्रकरणेलिंगसज्जिदिस्वरू
पनिरूपणंनामद्वितीयपटलः २

१०

श्रीगणेशायनमः देव्युवाच नमस्तेमेरुकोदंडधारिफणिहारिणे
वद विश्वेश दिक्षाया विधानं परमेश्वर १ ईश्वरउवाच शृणुदेविप्रवक्ष्या
मि दिक्षाविधिमनुत्तमं यस्यविज्ञानमात्रेणयोग्यःस्यालिंगधारणे २
उपलिप्यगृहंसम्यक् उक्तलक्षणकेदिने सुधादिशोभितंकुर्याद्रंगव
ल्याद्यलंकृतं ३ वितानतोरणाभ्युक्तंधूपदीपविराजितं सन्मंगल
समायुक्तं यथाविभवविस्तरं ४ यथाशक्तियथाभक्तिमनोन्मयर्थिसं
युतं कार्यंहिवैभवंदेवि वित्तशाठ्यंनकारयेत् ५ यजमानःसमुत्थाय

१

निर्वर्त्य प्रातराह्निकं मित्रबांधवसंयुक्तो मंगलस्नानमाचरेत् ६ स
शुभे स समे देशे गोमयेनोपलिप्य च रक्तमृत्तिकया तत्र विलिप्य चतु
रस्रकं ७ बाहुमात्रप्रमाणेन पंचवर्णैर्विलेखयेत् रंगकैश्चित्र
कैः पद्मैः सर्वत्र समलंकृते ८ मंडले नूतनं वस्त्रमाच्छाद्य तदुपर्यथ
पंचप्रस्थप्रमाणेन निक्षिप्य क्षालितं तुलान् ९ तदुपर्यमलं कुंभं निक्षि
पेन्नूतनं दृढं अनुलिप्य सुधाभ्यक्तमापूरितजलं शिवे १० पंचप
ल्लवसंयुक्तं कुंकुमाद्यैरलंकृतं अश्वत्थोदुंबरप्लक्षवटच्चूतमहीरु १

हान् ११ कलशोपरितः सूत्रं वेष्टयित्वा यथाविधि तदंतर्नवरत्ना
नि निक्षिपेद्भक्तिशक्तितः १२ स्ववर्णं वा यथाशक्तिस्तत्सर्वं गुरवे र्प
येत् प्राणप्रतिष्ठां कुंभस्य कुर्यान्मूलेन पार्वती १३ गृहीतं पट्टवस्
त्रं निक्षिपेत्कलशोपरि आबद्धकंठहारिद्रमावेष्टितमहांशुकं १४
संवेष्ट्य मालिकाभिश्च दिव्यधूपैः सुधूपयेत् चत्वारश्च द्विजस्तत्र गुरु
रेकस्तु पंचमः १५ समर्चयेयुः कलशं बिल्वपत्रैस्तिलाक्षतैः दुर्वा
भिः कोमलाग्राभिर्द्रोणैश्च करवीरकैः १६ पंचाक्षरेण तारेण पराप्र

२ सादमंत्रतः शक्तिपंचाक्षरेणैव पंच ब्रह्मानुवाककैः १७ अर्चयंति
पृथक्केनेपंचैतल्लिंग मृत्विजः ध्यात्वावाह्य महादेवं कलशोपरि पूजये
त् १८ मामनायंतमीशानमुमया सहितं शिवं १९ चतुर्भुजं चंद्र
कलावतंसं वराभयं रुरु कुठारपाणिं वामांकसंशोभितशैलकन्यं
भजे महेशं परमा सरूपं २० अथ संपूज्य विधिवत् षोडशोरुपचारकैः
यस्य स्मृत्यादिकर्माति समाप्य कलशार्चनं २१ उपस्थानं प्रकर्तव्यं
रुद्रैभिरपिपंचभिः॥ श्रीरुद्रश्यानुवाकेन मूलेन मनुनाशिवे २२ २

एवंदिनत्रयंकुर्यात्सप्तहंकलशार्चनं षड्रसैरन्नपानाद्यैर्भोजयेल्लिंग
धारिणः २३ अबध्यकंकणोदेविनियतोनियतेंद्रियः एकाहाराभ
वेन्नित्यंयजमानःपयोव्रती २४ अथतद्दक्षिणेभागेकुंभस्थापनदे
शतः वितानादिसमोपेतेस्कृतेवेदिकोपरि २५ निक्षिप्यपीठ
ममलंमूलमंत्रेणतद्गुरुः सद्योजातेनतदुपर्याछाद्यांशुकमुत्तमं
२६ वामदेवेनतदुपर्यंत्तल्लिंगंविनिक्षिपेत् अघोरेणाथलिंगस्यस
ज्जिकायागुणस्यच २७ तत्पुरुषस्यानुवाकेनईशानस्यानुवाकतः

क्रमेणकुर्यात्प्राणप्रतिष्ठांगुरुरादरात् २८ पूर्वोक्तमेवंध्यायीतलिं
गरूपांतनुंमम अवाहनादिकुर्वीतगुरुर्भक्तिसमन्वितः २९ मू
लेनावाहनंकुर्यादासनंशंभवेनमः पाद्यमीशायदेवायदद्यादर्घ्यंशि
वायच ३० दद्यादाचमनंस्नानंमहादेवायतेनमः पंचामृतस्नानम
थकुर्यात्संख्यानुवाककैः ३१ आपोहिष्ठेतिशुद्धोदकस्नानंलिंगायका
रयेत् दद्यात्कपर्दिनेवस्त्रमुत्तरीयंत्रिशूलिने ३२ यज्ञसूत्रंततोद
द्यात्पशुनांपतयेनमः गंधंकामांतकायेतिचाक्षतान्मृत्युघातिने
३३

पुष्पं वृषाध्वजायेति समर्प्यांगानि पूजयेत् शिवाय पादौ गुरवे गु
ल्फौ जंघे मृडाय च २४ जानुनि शंकरायेति नमरुरू भवाय च
कटिं पिनाकहस्ताय नाभिं मेरुधनुर्भृते २५ उदरं विश्वरूपाय
विरूपाक्षाय च स्तनौ हृदयं पार्वतीशाय वक्षः कैलासवासिने २६
कंठं तु नीलकंठाय स्कंदौ स्कंदस्रुनायेते अनंतबाहवे बाहू नह
स्तान् हस्तित्वचे नमः २७ अंगुलीरंगजहृते कक्षं पंचमुखाय
ते कर्णौ दिग्वर्णिने देवि नासिकां सर्वगंधिने २८ वक्रं तु सर्ववक्त्रा

४ यनेत्राणि त्रिदृशेनमः भ्रुवौ भूभारभंगाय ललाटमलिकक्षिणे ३९ शिरः
सर्वोत्तमायति सर्वांगशशिमौलिने पूजयित्वाखिलांगानि महापूजामथाच
रेत् ४० सहस्रनामभिर्देवि रुद्रसूक्तोक्तनामभिः मूलमंत्रेण चान्यैर्वा
स्तोत्रमंत्रैः समर्चयेत् ४१ पंचपुष्पाणि पूजायामवश्यं विधिनार्चये
त् द्रोणं च बिल्वपत्रं च नित्यं नित्यार्चने शिवे ४२ तिलाक्षतैस्तंदुलैर्वा
नित्या पूजां समाचरेत् यान्यन्यानि सुगंधीनि वन्यानि ग्राम्यजानि वा
४३ सर्वेस्यान्मम पूजायां पुष्पपल्लवपत्रकं ग्राम्यं वा वनं वीजैरपि सर्वस्या ४

केतकीं विना ४४ पत्रैरपामार्गकैश्च कल्हारैश्च कदंबकैः चंपकै
र्जातिकुसुमैर्मल्लिकावनसंभवैः ४५ उत्पलैः करवीरैश्च शेवंतीपाटलैः
शुभैः चूतपुन्नागबकुलमरुगैर्दवनादिभिः ४६ कुटुजैर्वा कुरब
कैः कुंदकेसरनागबकुलमरुगैर्दकैः इत्याद्युक्तैरनुक्तैर्वा मम लिंगं
ज संपूजयेत् ४७ दूर्वाभिस्तुलशीबिल्वैः करवीरैश्च कामलैः द्रोणै
श्च पंचभिर्नित्यं मम लिंगं समर्चयेत् ४८ मोक्षार्थी बिल्वजैः पत्रैरर्च
येच्च तिलाक्षतैः धर्मार्थी द्रोणकुसुमैरर्थार्थी करवीरजैः ४९

५ धत्तुरैरर्ककुसुमैरपामार्गैर्मनोरथी तुलसीशत्रुनाशाय जातिर्वश्या
ययोषितां ५० अर्कपुष्पं राज्यवश्यं नृपश्यं कमलार्चनं मल्लिकाभिर्ज
यार्थीचेद्दूर्वाभिः कीर्तिकामुकः ५१ आरोग्यकाम्यूसलजैः पुत्रका
मीकुरूंटकैः पुन्नागैः पशुकामीचसर्वार्थीसर्वसंभवैः ५२ एवंसं
पूज्यविश्वेशि प्रयहंतु दिनत्रयं तथाष्टांगयुतं धूपं गंधावगृहकारिणे
५३ कर्पूरादिस्फुद्दीपांश्च सामसूर्याग्निचक्षुषे नैवेद्यंषड्रसोपेतं यद्य
द्योग्यंममोदरात् ५४ अन्नानांपतयतुभ्यमिति मंत्रेणनिर्मलं तत्त ५

समर्पयद्देवि लिंगरूपे मयि प्रिये ९५ तांबुलं च सकर्पूरं रसज्ञाये
ति मंत्रतः घृताक्त वर्तिसंयुक्तं निराजनमथाचरेत् ९६ मंत्रपुष्पंत
तो दद्यात् त्र्यंबके ति स्रमंत्रतः प्रदक्षिणं नमस्कारान् कृत्वा स्तोत्रैः स्तु
वेदथ ९७ क्षमार्पणं प्रार्थनं च यस्य स्मृत्या क्षमापयेत् रात्रौ जागर
णं कुर्यात् मम लिंगस्य सन्निधौ ९८ लिंगेन सह कुर्वीत सज्जिका
या गुणस्य च प्राणस्थापनमारभ्य यथा लिंगस्य तत्तथा ९९ यदि
तं तु पयोपन्नो न चैवं सज्जिका गुणो यदि हमयि सज्ञाय दिवता ह

६ शागुणः ६० लिंगेन सह संस्कारं कुर्याद्वर्मतंद्रितः शैथिल्ये स-
ज्जायुकादेस्तु संस्कृत्य पुनरन्यतः ६१ अष्टबंधे विशीर्णे तु पुनर्बं-
धं च कारयेत् यदि मोहात्यजेद्देहं स चांडालो भविष्यति ६२ यन्न
ष्टं तत्र कुर्वीत यथाशास्त्रं गुरोर्वचः न तिष्ठन्नियमेनासौ लिंगसंपू-
जनादृते ६३ नान्यधर्मा भवेद्धर्मो नधर्मो धर्म एव च नान्यध-
र्मैर्न पाषंडैर्न दुर्वृत्तैर्न लोलुपैः ६४ न धूर्तैर्न गुरोर्भक्तैर्नाभक्तैर्ना-
नृताक्तिभिः न मत्तद्वेषिभिर्मूर्खैर्नानाचारैरनैरपि ६५ न षंढै- ६

नर्थलुब्धैश्चना गुरूक्तार्थकारिभिः नस्त्रीषुलोलुपैर्जारैर्नचौरैरासका
रिभिः ६६ नदुष्टकैर्हींसकैर्वानानार्हैश्चकच्चिद्गीये सहोपवेशयेद्वि
षद्स्त्रीयासंगमाचरेत् ६७ स्वपेद्गच्छेदुपश्लोकेवन्नालोकेन्वाभिवा
दयेत् यदिशक्तस्तदालिंगंशिवयोगीसमर्चयेत् ६८ पुण्यकालेषु
योगेषुविशेषेणसमर्चयेत् संक्रांतौविषवेच्चैवस्वजन्मत्रितयेदिने
६९ नवम्यांचचतुर्दश्यांसितायांसोमवासरे यथाशक्त्यार्चयेल्लिंगं
पौर्णमास्यांविशेषतः ७० अर्धोदयस्यलक्षणमाह ज्योतिषे अ

७

मार्कश्रवणे पातेयुक्ताचेसुष्यमाघयोः अर्धोदयः सविज्ञेयः किंचिन्यु
नो महोदयः १ कृष्णपक्षेत्रयोदश्यां मघामिंदुकरेरविः यदातदा
गजच्छायाश्राद्धैसर्वैरमापते २ नभस्यसितपक्षेचषष्ठीकुजदि
नेयदा रोहिणिपातयोगेनसाषष्टिकपिला स्मृता ३ अनुक्ता
अर्धोदयादियोगेषुग्रहणेचंद्रसूर्ययोः व्यतीपातेकुरुयोगप्रदो
षेचविशेषतः प्रतित्रयोदशीरात्रौशनियोगेविशेषतः ७१ कृ
ष्णभौमचतुर्दश्यां गुरूणांचमृतेहनि पित्रोःसिद्धिंगतदिनेविशे ७

षेण समर्चयत् ७२ शुक्लभौमचतुर्थ्यां तु कृष्णाष्टम्यां विशेषतः नृ
त्यवादित्रगीताद्यैर्यथाविभवविस्तरं ७३ दरिद्रः करतालैर्वा घंट
नादेन चार्चयेत् कोट्या ब्रह्महत्यानामगम्यागमकोटयः ७४ श्रवणे
नैव घंटायाः नानादस्या यांति संक्षयं श्रूयते हि जनैर्यावत् घंटानादः
समंततः ७५ तावत्पापानि रक्षांसि शिशक्यास्थांतु न हि क्षणं तस्मा
त्प्रयत्नतो देवि घंटानादं सुसाधयेत् ७६ तथैव यत्नतो देवि ताडये
ज्जयघंटिकां तदभावेपि यत्नेन कांशनादं समाचरेत् ७७ कुर्वीत

६ कहल्लानादं मम लिंगार्चनोत्सवे लिंगधारीविशेषेण शंखनादेन
पूजयेत् ७८ सर्वाभावेपियत्नेन यतः शंखोममप्रियः दीपान्प्रज्वा-
लयेद्देवी मम लिंगस्यसन्निधौ ७९ अभिषेकः प्रकर्तव्यो यथाशा
क्त्यामलोदकैः चुलुकोदकमारभ्य यावच्छक्त्याभिषेचने ८० ताव
दासेचयेल्लिंगमधिकस्याधिकं फलं ८१ ग्रंथांतरेअष्टगंधलक्ष
णमालिख्यते कस्तुरीकुंकुमं गंधं कर्पुरं चसुशोभनं उसीरं चागुरुः
कोष्टं तमालदलमेव च १ शिवाष्टगंधमेतत्तु ह्यष्टमुर्त्तिस्वरूपकं ६

साधयेद्यत्नतो गंधं कस्तुर्यादि स्वशक्तितः ६२ अशक्तः सर्वयत्ने
न द्रोणपुष्पैः समर्चयेत् सर्वदा सर्वयत्नेन सर्वस्यकातु पार्वती
६३ सर्वलाभासरं महालिंगार्चनपरो भवेत् यथाशक्ति यथाभक्ति
यथाकालं यथासुखं ६४ यथासंभाविते द्रव्ये लिंगपूजापरो भवेत्
चतुर्थेतु दिने देवि कृत्वोषस्यवगाहनं ६५ यथेष्टं यजमानस्य मंग
लस्नानमाचरेत् समेत बहुभिर्वृद्धैः शिवतत्वार्थवेदिभिः ६६
लिंगपूजासुनिरते लिंगिभिः शिवयोगिभिः पिष्टपुराणं लिंगमेनं

दीशं पूजयेच्छिवे ८७ नंद्यूर्मिकासदाधार्या भक्तस्यांगुष्टपर्वणि नो
च्छिष्टदोषः चान्यान्यं भुंजतां धृतलिंगीनां ८८ नच प्रक्षालनं पाण्या-
स्तदुच्छिष्टधीयाशिवे शयानः श्रीगुरोः पादपद्माग्रे शयिता भवेत्
८९ यथाशिवे तथालिंगे यथालिंगे तथागुरौ यथागुरौ तथाप्राणेत
थाप्राणानुशासने ९० यथायथैव तच्छास्त्रमते चापि तथाभवेत्
एकाभिमानः सद्भक्तिर्वीरशैवमते मम ९१ लिंगधारणमात्रेण कु
तोसौ मानुषः शिवे सदाविभुतिसंपर्कात्सदारुद्राक्षधारणात् ९२

धारणान्ममालिंगस्य सोहमेव न संशयः अणुमात्रमपीशानि ल-
लाटे यस्य दृश्यते १३ मन्नामपाविनाभूतिः सोहं रुद्रो न संशयः
धृतसद्भूतिसर्वांगं ये पश्यंत्यपि पापिनः १४ त एव धन्या गिरिजे
ते चान्यान्पावयंति च यस्य देहेस्ति रुद्राक्षो यावद्भक्त्यैक एव वा १५
तं दृष्ट्वा दूरतो यांति पापानि विविधानि च विभूतिरपि रुद्राक्षं लिंगं
यस्य त्रयं तनौ १६ स साक्षाद्रुद्र ईशानि सोहमेव न संशयः मम
लिंगार्चना भूति रुद्राक्षमनुजापनैः १७ एकैक एव मन्त्रास्येकिं

१०

फलं सर्वसन्निधौ ललाटे भस्मनापुंड्रं करे रुद्राक्षजापनं १६
कंठेच लिंगाभरणं सोहमेव न संशयः ११ क्षेपकश्लोकानि ३
२००० इति श्री पारमेश्वरे तन्त्रे शिवाद्वैतसिद्धांते वीरशैवदिक्षायां-
लिंगार्चनविधिन्त्रितीयापटलः ॥

१०

श्रीगुरवेनमः इश्वरउवाच उपविश्यगुरुः पिठे प्राणायामादिकं
चरेत् वीरशैवाख्यदीक्षांगंकरिष्येहोममियथ १ कृत्वासंकल्पमीशा
निहोमदेशंविशोधयेत् स्थं वापिकुंडंवायथाकामंसमाचरेत् २
स्थंडि सर्वसंपतिः कुंडेसर्वार्थसिध्दयः स्थंडि त्रिविधंप्रोक्तंकुं
डंपंचविधंशिवे ३ चतुरस्रत्र्यस्रवृत्तभेदाधर्मार्थकामदाः चतुरस्र
त्र्यस्रवृत्तार्धचंद्राः कमटाक्रमाः ४ धर्मार्थकामसायुज्यंकैवल्यफल
दायिनः एतेषु [illegible] वन्यतमेदेवि प्रदेशे होमकर्मणः ५ पुण्याहवाचनं

१ कृत्वानांदीकर्मसमाचरेत् पंचगव्यादिकंपीत्वासभांचशिवयोगिनां
६ संपूज्यशक्तितोभक्त्यागुरुरग्निमथानयेत् योगिनिभिः सहेशा
निवतुर्भिर्लिंगधारिभिः ७ सूर्यारणिशिवागारशिव। गृहादि-
भिः मूलमंत्रेणचोद्दिध्याभिवादैश्चमुद्रया ८ ग्रंथांतरेपंचमुद्रा
प्रदर्शयेत् स्तंभनंचतुरस्त्रंचधेनुंमत्स्यंतथैवच योनिमुद्रानम-
स्कारेपंचमुद्राप्रकीर्तिताः १ पूर्वभागेग्निकुंडस्यसंस्थाप्याग्निम
थोपरि संकुर्यात्स्थापनंदेशंवीक्षणादिभिरष्टभिः १ विक्षणंताड १

णंदेवि प्रोक्षणंचाभिमर्शनं घातनंप्रार्थनंचाभिमंत्रणंचनमस्कृतिः
१० विक्षयेप्रणवेनादौयागदेशंगुरुशिवे तथाष्टमंत्रितांयेनप्रो
क्षणंताडनंविदुः ११ तदेवप्रोक्षणंनामरुक्तेक्ष्णादिभेदतः
स्पृष्टाहस्तेनतकुंडंजपोयव्यभिमर्शनं १२ घातनंतुस्वनित्र
णस्वातनंहवनस्थले प्रार्थयन्मूलमंत्रेणयथाशक्त्याभिमंत्रणं १३
तेनैवद्वादशजपैः स्पृष्ट्वातदभिमंत्रणं नमस्कृतिर्नमस्कारैरेतै
रुष्टभिरन्वितैः १४ मेखलेखत्रयसंयुक्तेसाश्वत्थदलशोभिते साधार

२

न्यं तरोगाधेला दक व्यायामशोभिते १५ मूलेनाग्निं प्रतिष्टाप्यपु
नस्तेनानुमंत्रयेत् हूमिति प्रोक्षितंचाग्नो निक्षिपेत्समिधां शतं १६
धमन्याक्ष्वमयेदग्निं कवचेन गुरुः शिवे ज्वलिताग्नो पुनर्ध्यायेन्मामे
वपरमेश्वरि १७ चतुर्भुमुद्रारांगंचंद्रशरवरमव्ययं कुठारेणाभय
वरपाणिपंकजशोभितं १८ वामांगालिंगिताद्रींद्रतनयंपरमेश्वरं
मंदस्मितं त्रिनयनमुमारमणमीश्वरि १९ अथध्यायेतभवतिमेवंरू
पांविचक्षणः उद्यदादित्यसंकाशामरुणाभरणांशुकां २० अंतग

२

तमहन्हिं गुर्वीणी कुंडरूपिणीं सहतारेण मूलेन दध्यादाज्याहुति
र्देश २१ शिरासि जगतामीशे स्यने नाग्निं विभावयेत् तद्गर्भजठ
रे देवि समुत्पन्नं हुताशनं २२ नमो ग्नये ति रूद्राय पशुनां पतये नमः
नम उग्राय वीराय नमस्ते चंद्र मौलये २३ इत्यग्नो पृथगाज्येन हु
तेरेवं शताहुतीः अथ यत्नेन कुंडस्थं ध्यायेद्दुद्दुताशनं २४ स
प्तहस्तं चतुः शृंगं सप्तजिह्वं द्विशीर्षकं त्रिपादं निर्मलमुखं सुखा
सीनं शुचार्पितं २५ तोमरं व्यजनं वालं चाप बाणौ वराभये दधानं

२ सर्वभूषादयं सद्योजातं महेश्वरं २६ नमो रुद्राय देवाय चेशानाय कप
र्दिने हुताशनाय नीलाय लोहिताय कं कुर्यते २७ सहतारेण मूले
न प्रतिमंत्रांतरं लदा जुहेदाज्येन देवेशि षोडशज्याहुती क्रमात् २८
नज्ञास्यज्यातकर्मार्थं हुनेदाज्याहुतिर्दश २९ सहतारेण मूलेन जात
कर्मेदमुच्यते २९ रुद्राग्निरितिचेशानि नाम कर्मैवमाचरेत् सहता
रेण मूलेन हुनेदाज्याहुतिर्दश ३० पृथग्भूतमुमेशाभ्यामग्निं संचिं-
त्य योगिनं कुर्यान्निष्क्रमणं नाम हुनेदाज्याहुतिर्दश ३१ कर्णवेधा २

भिधं नाम संस्कार मणिकुंडलं भावयित्वा शुचिः कर्णे कुने दाज्याकु-
तिर्देश २२ अथान्न प्राशनार्थं च चोलार्थं क्रमात्ततः दश कृत्वोपनयनं
नाम संस्कारं मूलमंत्रतः २३ तारेण शत मूलेन नमो रुद्राय चक्र
मात् कुने दाज्याकुतिर [illegible] प्रीत्यर्थं विंशतिं कुनेत् २४ शतमष्टो
त्तरं पश्चात् मूलेनान्येन पार्वति कुर्याद्विनाह संस्कारं स्वाहाया
सह वैशुचेः २५ तरुणं रूपसंपन्नमर्चिषदीप्ततेजसं स्वाहाशोभि
तवामांकमभिध्यायत् कुताशनं २६ तस्य जिह्वा महादेवि सप्त से-

४ सर्पिषः शुभाः ध्यात्वाक्रमेण जुहुने सप्तसप्ताहुतिः शिवे ३७ ले
लीहानाकरालीचरो चिव्हेशगात्रि लोहिता विद्युत्प्रभा शिवाख्या च
तत्र मध्यावाभिधा ३८ तस्यां विशेषतो देवि जुहुने दाज्याहुतिर्दश
सहस्तारेण मूलेन ध्यायद्दुद्रमयं शुचिं ३९ अर्थार्थि लेलिहानायां
करालयां धर्मकामतः पुत्रकार्यार्थवानूरो चिव्हेशायां पुष्टिकामनः
४० आयुष्कामी जुहुने स्छांति लोहितायां पशुन्प्रियः विद्युत्परिविना
शार्थं प्रभायां शिवलोकधीः ४१ मोक्षार्थे जुहुयाद्देवि शिवायां च ४

ततोमम दशद्वादशपंचाष्टत्रिंशषोडशाषष्टितः ४२ अष्टोत्तर
शतंचैवहुनेदाज्यहुतिंशिवे अथकुंडस्यपरितोमेखलात्रितये
यजेत् ४३ जयाचविजयाभद्रानित्यागौरीककुद्मती ईश्वरीशां
भवीदिव्याज्वालिनीभोगदायिनी ४४ कल्याणीगगनारक्तनं
दाज्योतिष्मतिःक्रमात् प्रणवादिनमोमंत्रैर्दिक्षुपूर्वादिषुक्रमा
त् ४५ पाशांकुशचापवराभीतिहस्तार्धेंदुशेखरा तृतीयस्यां
मेखलायांपूज्याषोडशशक्तयः ४६ हृल्लेखागगनारक्तामहोच्छु

५ ष्मा कपिंजला आरुणा मालिनी शांता निद्रा चुक्रोधनी क्रिया ४७
अलंबुषा सिनीवाली कुहू राका यथाक्रमात् मध्यमे मेखलवृत्ते पू
ज्या षोडश शक्तयः ४८ अमृता मानदा पूषा पुष्टि तुष्टि रतिर्दृतिः
शशिनी चंद्रिका कांता ज्योत्स्ना प्रीतिः प्रियंवदा ४९ गांधारी हस्ति
जिह्वा च विपनी च क्रमाद् ॥ प्रथमे मेखला वृत्ते पूज्या षोडश श
क्तयाः ५० इंद्राद्या अष्टदिग्पाला वाहनादिषु संयुताः दुर्गाग
णपतिक्षेत्रपालमृत्युंजयास्ततः ५१ अभयंकर ईशानि मध्ये ५

दिक्षु विदिक्ष्वपि स्ववाहनायुधोपेता पुज्याः कुंडे ततो हुनेत्
५२ क्रमेणाज्याहुतिं तेषामेकमेकमतंद्रितः जयादिशक्तिमार
भ्याभयंकरमथांततः ५३ सहतारेण मुलेन त्रिपंचाशत्कुलेश्वः
रि अथ संप्रार्थयेदग्निं ज्वलंतं मम रूपिणं ५४ नमस्ते सप्त
जिह्वाय नमस्ते रुद्रमूर्तये नमः सर्वहविर्भोक्त्रे नमो दिक्ष्वग्नये
नमः ५५ चतुःश्रृंगाय शांताय वीतिहोत्राय ते नमः वैश्वा०
नराय देवाय वन्हये विश्वकर्मणे ५६ धनंजयाय रुद्राय ज्वलना

६ यनमोस्तुते नमस्तेतूनपादेते नमस्तेज्यातवेदसे ८७ उषर्बु
धाय बोध्याय अहिर्बुध्न्यायते नमः नमस्ते हिषनियं नमः शुष्क्या
यशंभवे ८८ कृपीटयोनये तुभ्यं नमस्ते कृष्णवर्त्मने आश्रयाशा
यचबृहद्भानवे ते नमो नमः ८९ इति संप्रार्थ्य कुंडस्थमाव-
योस्तनयं शिवे अवयारेक रूपेण ध्यायेदग्निमतंद्रितः ९०
प्राणवैरष्टभिस्तायेः परितोग्नेर प्रोक्षयेत् नमःपञ्चांगुरः कुर्या
दग्नेः परिसमोहनं ९१ प्रणवेनाहृतैर्दर्भैः परितोग्निं परिस्तरेत् ६

प्रणवेनाग्न्युपस्थेच पालाशान् परिधीन् क्षिपेत् ६२ औदुंबराः शमी
जातायदिकामप्रदाः शिवे पालाशाश्वत्थकाश्मर्यमयाः परिधयोन्यव
तः ६३ अथाग्निमर्चयेत्सभ्यादिक्षु रक्ताक्षतैः शुभैः प्रागादीशा
नपर्यंतक्रमेणैभिः प्रदक्षिणैः ६४ नमः शिवाय रुद्राय मृडाय श
शिमौलये ईशानाय गिरीशाय रुद्रायाष्टांगमुर्तये ६५ अलं
कृत्याष्टभिर्दिक्षु पुष्पैरप्यमलैः शिवे अग्नेरुत्तर दिग्भागे बर्हद
र्भान्निक्षिपेत् ध्रुवं ६६ तेनैव प्रणवाद्येन चैतत्तदुपरिक्षिपेत्

७ दर्व्याज्यस्थालिकाश्चैव प्रोक्षणी पूर्णपात्रिका ६७ इध्मस्रुवावि
ष्टीशानि षट्पात्राणि प्रयोजयेत् सहस्त्रिरन्वदर्भाग्रपाणिनावी
क्षरसांभसा ६८ कृत्वोत्तानानि पात्राणि पुनश्चावोक्षयेत्त्रिये प्र
णवेन हृदां मूर्ध्नि प्रोक्षणी मग्नतानयेत् ६९ सहतारेण मुखेन सा
क्षतं जलमानयेत् शिवाय शंभवे तुभ्यं नमो रुद्राय मृत्यवे ७०
प्रोक्षक्षयेद्यागसामाग्र्यं सपवित्रेण पाणिना तदन्यत्र समुत्सृज्य
पुर्णपात्रमथाहरेत् ७१ तच्चापि पूर्ववत्कृत्वा चोधृत्य समुखतः समं ७

क्षिपेदुत्तरतोग्नेश्च हुंफट्स्वाहेतिमंत्रतः ७२ तदुपर्यष्टभिर्दर्भै
राचार्यः प्रणवेन च मूलमंत्रेण चाभ्यर्च्य नमस्कृत्याभिमंत्रयेत्
७३ ततः आदाय आचार्य आज्यस्थाल्यां पवित्रकं अपनीयं क्षि
पेद्वन्ह्याज्यसंस्कारमाचरेत् ७४ अंतर्गतपवित्राय अज्यधा
नीं पृथक्चरेत् नमः ॐ निक्षिपेद्वन्हौ स्वाहा देवी विलापयेत् ७५
हुंफट्दर्भाग्रयुगुलमाज्यधान्यां क्षिपेद्धविः प्रदर्श्य ज्वालितान् द
र्भान् पुनस्तैरेव साग्निभिः ७६ सहतारेण मूलेन क्षिपेद्वन्हौ

६ शिवेर्पयेत् अथस्रुवांसमारभ्य वायुमाग्नेयकोणगं ७७ अपूर
येद्दविर्ह्विषा माज्यधारांगुरुःशिवे तदानीभतिमारभ्येशानांतता
रवर्मणा ७८ शास्त्रमूर्ध्नासृचादेविजुहुयाच्चक्षुषि सृचा तारपू
र्वेणमुलेन शिवायेति समर्पयेत् ७९ अथस्रुजाज्यमाचार्यश्च
त्विजश्चसमंततः दक्षिणादिक्प्रतीचीषुपविश्याग्नौजुहुनेत्पृ
तं ८० पंचानुवाकमंत्रैस्तु शतमष्टोत्तरं क्रमात् सहस्रारेण
मूलेन सहस्रंचसहर्त्विजा ८१ प्रत्येकंगुरुणाहोमःकार्योग्नौ ६

गिरिनंदने अथ हुत्वा ष्टदिक्पालान् ताराहुं फट् शिरोन्वितं ८२ दुर्गां गणपतिं गौरीं ईश्वरीं अचलाख्यजां दुर्वाससं शिवं रुद्रं त्रियंबकं कुसुमापतिं ८३ कश्यपं कपिलं कण्वं जमदग्निं च नंदिनं वृषभं भृंगिरिटिकान् कुमारमपि पार्षदान् ८४ एकैकश्यक्रमाद् ष्टौ हुनेद्राज्याहुतीः प्रिये हुनेन्नवग्रहान् तत्तन्मंत्रैः पूर्णाहुतिं हुनेत् ८५ कृत्वा स्विष्टकृतं पश्चात् प्रायश्चित्ताहुतीं हुनेत् अग्निमूर्धा गनयेवेति कद्रुद्राया नुवाककैः ८६ पंचब्रह्ममयेस्तार मूलेन क्रमशो हुनेत् सहतारेण मूलेन होमशेषं समापयेत् ८७ ततः शाखानुसा

रेण गुरुरेवमतं स्थितः ॥ ९९ ॥ इति श्रीपारमेश्वरतंत्रे शिवाद्वैत-
सिद्धांते वीरशैवदिक्षाप्रकरणे दिक्षाहोमप्रकारणं नाम चतुर्थ-
पटलः ॥ ४ ॥

श्रीगणेशायनमः अथश्रृणुमहादेविदीक्षाबंधनलक्षणं सज्जिका
गुणलिंगानां संयोगक्रममादितः १ पुनःसंपूज्यतल्लिंगंयथाशक्त्यु
पचारकैः सज्जिकांचगुणंवस्त्रमुद्रास्यप्रणवेनतत् २ स्मृत्वामांमू
लमंत्रेणगुरुरावाह्यसज्जिकां आभिमंत्र्यानुवाकैस्तैः स्वीकुर्याच्चगु
णंततः ३ द्विषड्वारंतुसूत्रेनाभिमंत्र्याथनियोजयेत् सहतारेण
मूलेनयोजयेसज्जिकागुणं ४ तेनैवांतस्तरेद्वस्त्रं लिंगंतेनैवपूजय
त् तेनैवोपरिसौवर्णंपूजयेत्पुष्पमुत्तमं ५ सूवर्णरहितंलिंगंधारय

न्नकदाचन ससुवर्णमभिष्टार्थ कार्यं लिंगं न संशय॥ ८॥ कपाटं बंधयेद्दे
विमूलेन गिलयोजनं मुखेनवस्त्रमाबध्य संप्रदाय गुरू कृतः ७
विशिष्टपूजयेद्देविध्यायेत्तां सज्जिकाननः ममरूपं परं ध्याला स्तू वीता
नेनपार्वति ८ नमः शिवाय रुद्राय शंकराय कपर्दिने मृडायनिल
कंठाय नमो धूर्जटये नमः ९ ॐ नमः परमेशाय नमः ओंकार रूपि
णे चपाशियाय शर्वाय स[illegible] वाय शशिमौलये १० नमः फणिंद्र
भूषाय तरक्ष गजचर्मणे नमो ललाटनेत्राय नमस्तेत्वष्टमूर्तये
११

नमस्ते पंचवक्त्राय नमो मृत्युंजयाय ते नमोंधकद्विषे तुभ्यं नमस्ते
मेरुधन्विने १२ नमस्ते पार्वतीशाय गणनायकसूनवे नमः कुमा
रपुत्राय नमो गंगाधराय ते १३ नमस्त्रिपुरसंहर्त्रे नमो उग्राय
वीराय नमः पाशुपते हर पाहि मां गीरिजानाथ क्षेमस्व मम विभ
यं १४ तिष्ठ देहे मम सदा मम देहे तवास्मि तां देहि सायुज्यमिशा
न सौभाग्य शिवशंकर १५ इति स्तुत्वाथ तल्लिंगं सहस्त्रित्रिगुणां
शुकं निक्षिप्य पूर्ववत्पीठस्तुत्वा नवाभिषेचयेत् १७ ऋत्विकचतु

ष्टययुतो गुरुस्तत्कलशांभसा पीठस्थं यजमानं तं अभिषिंचेदिमं क्र

मात् १८ पंचानुवाकेस्तारेण मूलमंत्रेण रुद्रतः शुध्दवस्त्रधरं भक्तं

सर्वालंकारसंयुतं १९ सहतारेण मूलेन स्वाभिमंत्र्याष्टधा गुरुः

विभुत्तिधारणां भक्तशरीरे स्वयमाचरेत् २० आदौ शिरसि मूलेः

न प्रणवेन ललाटके नमः कंठे क्षियुगले स्वाहा कर्णद्वयांसयोः

२१ वषट् वौषट् भुजद्वंद्वे हुं फट् तन्मध्यमाग्नयोः प्रणवेन हृदीशा

नि हृदा कंठे पराभिधे २२ तारेण वक्षसि शिवे मूलेनादरनाभिके

रुरूजान्वं ग्निजं वासरूप्रणवेनैव कल्पयेत् २३ यथाशक्त्याथरुद्रा
क्षान्धारयेत्तं स्वयं गुरुः संप्रदायानुसारेण वृक्षासि रुद्राक्षभस्म दी
नां २४ अथभक्तो गुरुं देवि पूजयेद्भक्तिशक्तितः मणिकांचन
वस्त्राद्यैरर्चयेत्सर्वमीश्वरि २५ गुरोर्दक्षिणपादस्य निबध्यांगु
ष्टमूलके सूत्राग्रमन्यत्तस्याग्रं गृहीत्वा हस्तयुग्मतः २६
अथोपदेशं कुर्वीत गुरुः शिष्याय मे मनुं संप्रदायानुरूपेण यथो
क्तेन विधानतः २७ इत्थं निर्वसरदेवेशि दीक्षां पुर्वांगसंयुतां स

२ बध्वितगुरुर्लिंगशिष्याय ममशेलजे २८ मोक्षार्थिनः शिखादेशे
बाहुमध्येतु धर्मिणः कामार्थिनः करेदेशके सर्वार्थिनः प्रिये २९
अष्टोत्तरशतं जप्त्वा मममूलंमहामनुं आबध्वितगुरुर्लिंगंदेहेशि-
ष्यस्ययत्नतः ३० गायंतीभिः पुरंध्रीभिः सर्ववाद्यविघूर्णितं सन्मं
गलसमायुक्तं यथाविभवविस्तरं ३१ अथशिष्यागुरुं भक्त्याप्रण
मेद्भक्तितः पुरः आशीर्वदेद्गुरुः शिष्यमस्तके हस्तसंयुतः ३२
सुपुत्राधनसंपत्तिन्नो बलीशौर्याबिकाभव अथार्चयेसभांदेवि

स्वशक्त्या शिवयोगिनां २३ दक्षिणां शुक्तांबुल प्रणामाद्यैश्च भक्ति
तः निर्मलैरन्नपानाद्यैर्भोजयेल्लिंगधारिणः २४ यथाशक्तिय
थाभक्तिः सिद्धः शिवमयो जनः तदाप्रभृतिभक्तो सौ लिंगपूजापरा
यणः २५ समबुद्धिर्भवेदात्म गुरुलिंगशिवेषु च त्रिकालमर्च
येल्लिंगं न्यायार्जितधनादिभिः २६ द्विकालमेककालं वा सर्वदा
लिंगमर्चयेत् न स्वस्थनयजे पूजां नानापदिनिमित्ततः २७ यदि
यजति मूढात्मा रौरवं नरकं व्रजेत् स्नानं तु भस्मना नित्यं सर्वाचार

४ स्यपूर्तये ३८ नस्पृष्ट्वबुध्या स्नायीत यदि कुर्यासपातकी लिंगं-
ममधृतं यन निविष्टाखिलकर्मणा ३९ येसंतिजातिभेदास्तानेकव
ह्लिवयोगिनः पश्येदखिलजातिस्थानेकमातृसहोदरान् ४० न
स्त्रिभेदो नपुंभेदोजातिवर्णाश्रमादिकं सर्वातीतमिदं विद्धि वीरशै
वमत्तं मम ४१ यदानायासतोदेवि भोगमोक्षैक२स्थितो धारणा
न्ममलिंगस्य पूजनाञ्च निरंतरं ४२ नान्यकर्म नवैकार्यं व्रतमेत-
न्महह्लिवे एकेस्य द्रोणपुष्पस्य फलमप्यर्पितस्य तत् ४३ ४

वक्ष्यामि शृणु देवेशि तद्द्वारे किंकरोस्म्यहं यद्द्रोणकुसुमैः पूजा मम
सन्निधिकारणं ४४ करुणात्तस्य न मोक्ष्यामि कल्पकोटिशतैरपि
यद्येकमपि देवेशि बिल्वपत्रं समर्चयेत् ४५ मम लिंगविशेषेण स
दा तिष्ठाम्यसंशयः तिलाक्षतैः शमीपत्रैरपामार्गैः पयोरुहैः ४६
दुर्वाभिश्चार्चयेन्नित्यमन्यैरपि सुगंधिभिः न द्वेषं चिंतयेल्लिंगधा
रिणे शिवयोगिने ४७ न बालयुववृद्धादितारतम्यधिया भजेत्
प्रसन्नश्चित्तदान्योन्यं दृष्टमात्रेण लिंगिनः ४८ अभिवंदेत्तदान्यो

८ न्यं न भेदो लिंगधारिणां न ब्रह्मचर्यं नियमो न वानप्रस्थलक्षणं
४९ न संन्यासो न वैराग्यं यदि लिंगार्चने रतिः न मुंडनं नापि शि
खा न शुक्लो नारुणः पटः ५० नानेकशाट्येकशाटिः स्वेच्छाभोगा
हि लिंगिनः सामान्येनार्चयेल्लिंगं नित्यं नित्यक्रमेणतः ५१ नैमि
त्तिके न कुर्वीत काम्यं कामानुसारतः सार्वत्रिके नित्यपूजां षोडशैरु
पचारकैः ५२ यावल्लब्धं यथाशक्ति र्नायासस्तत्र विद्यते यावन्नै
मित्तिका पूजा स्वजन्मर्क्षादि पूर्ववत् ५३ अभिषेकादिकं यावल्ल ८

क्त्या कुर्याद्विशेषतः पृथक् दधिमधु पृथक् सिताक्षीरघृतादिभिः
८४ अभिषिंचेत्प्रयत्नेन ममलिंगं महेश्वरि अभिषिंचेद्यथाशक्ति
नारिकेलफलोदकैः ८५ अन्नेन नवनितेन मृदुशर्करयापि च
पंचामृतैर्यथाशक्ति विशेषेणाभिषेचयेत् ८६ शीतलैः शुद्धतोयै
श्च सुसंशुद्धैः सुगंधिभिः धूपदीपसुपुष्पाणि मृदुनैवेद्यमर्चयेत्
८७ अन्नाद्यैरर्चयेद्भक्त्या स्वशक्त्या लिंगधारिणः लिंगवस्त्रगुणा
दीनि दद्याद्वाद्यसमन्वितं ८८ स्वर्णतांबुलपुष्पाद्यैर्यथाभक्त्यास

९

मर्चयेत् स्वाप्यपृष्ठे त्ततः सर्वं यदस्या दिस्यात्सन्निधौगुरोः ८९
संपादितं स्वशक्त्यायत्तदुक्तं यत्तदाचरेत् गुरोस्तु जन्मनक्षत्रे
सिद्धिंगतदिनेपिच ९० यथाशक्तिर्यथाभक्तिः पूजयेल्लिंगधा
रिणः नसमिक्ष्य क्वचिद्वापि लिंगिनं शिवयोगिनं ९१ नाचरो
वानना चरो लिंगी स्यात्स विशिष्यते धृतलिंगमहाभस्मरुद्राक्षाः
शिवयोगिनः ९२ शिवास्तेशिवभक्तत्वादागताइतिचिंतयेत्
यदस्ति दुरेवादेवि शिवयोगी शिवार्चकः ९३ संप्रार्थ्याकारयेध्य

९

र्धान्यदहं सउमेशृणु आलाभेगृहिणावापिस्वचेल्लिंगिनएवहि ६४ शक्तिमात्रविशेषणह्यशक्तोलिंगमर्चयेत् नकर्षेद्धरणींवी रशैवदिक्षासुदिक्षितः ६५ नखातेनखनेत्कापिनछेद्येन्नैवबं धयेत् नवहेच्छिरसाभारंनकाष्टेनेतरंलघु ६६ यदिछाकुसु मंधार्यंजटाष्णिषादिभूषणं दीक्षितावीरशैवायां दिक्षायांधृत- लिंगिनः ६७ ननीचमोचेरकर्मनायासंनापिकुच्छितं अथका म्यानिकर्माणिवक्ष्यंतेलिंगधारिणः ६८ यदिस्याद्योगिनीयुक्त

७ स्त्वदेशंव्रतमाचरेत् सोमवारविशेषेणद्रोणपुष्पाणिचाहरेत् ६९
अभिमंत्र्याथमनुनातानि पंचाक्षरेणवै एकवारंसमुच्चार्यमंत्रमममस
मंपुनः ७० एकंसमर्पयेद्देवं सहस्रंप्रतिवासरं नियमेनैकवर्षी
तमुपोष्याऋक्षदर्शनात् ७१ निधिलाभः पुत्रलाभः शिवएव
नसंशयः तुलसीशत्रुनाशाय धत्तूरैः रोगनाशनं ७२ शमीशत्रु
विनाशायकीर्त्तिदाहितिलाक्षतैः शिवरात्र्यांमहादेवस्नानायदक्ष
मयेह्रदे ७२ संस्थाप्यपुरतः पीठेपूजयेल्लिंगमात्मनः कन्यार्थी ७

पूजयेद्दर्कैर्वश्यार्थी तु शमी दलैः ७४ मोक्षार्थी बिल्वजैः पत्रैः स
र्वार्थी द्रोणसंभवैः दुर्वाभिराजवश्याय विर्यायोत्पलजैरपि ७५
वश्यकामी पयोजातैः सर्वार्थ्यन्त्वनसुंदरि पुत्रकामी पाठजैरकर
च्चाटयेद्रिपून् ७६ करवीरैर्भवेज्ज्ञानं विद्यापुन्नागसंभवैः कु
रंटकैर्धनप्राप्तिर्धत्तुरैर्मारयेद्रिपून् ७७ चूतैर्विषविनाशाय म
धूकैः पशुवृध्धये चंपकैर्मित्रलाभाय नीपजैर्निधिसिद्धये ७८
जातिभिर्भोगसिध्यर्थं मल्लीसंपत्समृध्धये सर्वाभिष्टार्थसिद्ध्यर्थं

६ द्रोणपुष्पैः समर्चयेत् ७९ तिलाक्षतैर्बिल्वदलैर्नित्यपूजां समाचरे
त् यथाशक्त्यर्चयेद्दानैरतिथीन् शिवयोगिनः ८० तोषयेत्सर्वयत्ने
न यद्यकालसमागतं भक्त्यानाभिगमनं वंदनं प्रियभाषणं ८१
आसनं चान्नपानादि यथाशक्त्यर्चयेच्छिव सर्वाभावेप्यशक्तो वावि
नयादिभिरर्चयेत् ८२ कल्याणिं वा वदेद्वाणीं प्रमादादथवान्यथा
यदि चेदवमानेन निराशा निर्गतातिथिः ८३ इष्टापूर्त्तं कृतं दत्तं स
र्वमादाय गच्छति अहमेव महेशानि धृत्वा जंगमविग्रहं ८४ ६

सद्भक्त्यानुग्रहार्थाय पर्यटामि महीतले तस्माद्भक्त्या यथाशक्ति
पूजयेच्छिवयोगिनः ९५ लब्धमात्रेण च गृहे शिष्टेन स्वात्मजीव
नात् योर्चयज्जंगमान् भक्त्या मामेवार्चितवान् स हि ९६ यो वि
ज्ञानालिंगिरिजे समामेव न संशयः अर्चयेज्जंगमं धन्यः सं
ध्यायां गृहमागतं ९७ साक्षात्मद्रूपमीशानि शयनासनभो
जनैः अनाथं रोगिणं दीनं मूकं बधिरमेव च ९८ पंगुं मुंडं दु
राचारं नावमन्येत लिंगिनं नैकार्यः कलहादेव अन्योन्यं शिव-

१ योगिभिः ९१ नपेशून्यनमाछूर्यनद्रोहंनापिपीडनं नस्पृ
दायुधंक्वापि प्राणैः कंठगतैरपि १० नछेदयेत्तरुंवापीलिंगमु
द्रांकितंयदि १२ नापसव्यंव्रजेद्योगीशिवलिंगीविलोकयन्
नाधिरोहेत्तनूद्वाहंस्यं रथंवातुरंगंगजं १३ येथेछंविहरेल्लिं
गीह्युपानत्पुष्पादुकादिभिः वृषभंलिंगमुद्रांकंदृष्ट्वाभूमौरवने
न्नमृद १४ नस्पर्शयेच्चनापेक्षछागादिभिर्मांसलोलुपैः शैवदी
क्षाश्रितालिंगीनेवालिंगीनमर्चयेत् १५ नैवापेक्षेगतस्पृजाम १

र्चयेदेव लिंगिनं पू पि पूजकावापि लिंगिनामेव लिंगिभिः
९६ नान्यैर्भयं न चान्येषामाचारोयं हि लिंगिनां असमानत-
यानर्हान्मन्मताभ्रय वर्जनात् ९७ पूज्यपूजक कर्मादौ यद्यो
ग्याह्य लिंगिनः तद्वंदने च पूजायां दर्शने भाषणेपि वा ९८
संबंधे संगमे वापि सल्लापे सहभोजने शयने सहयाने वा सुख
दुःखादिषु प्रिये ९९ लिंगिनां शिवभक्तानां योग्या एव हि लिं
गिनः ज्ञानविज्ञानसंपन्नः सर्वसाधनवानपि १०० अस्तु

२० द्धएवदेवेशिय लिंगीभवेज्जनः अशिष्टोवाविशिष्टोवाभ

क्तोभक्तोपिवायदि १ अलिंगिभ्योवरालिंगीलोहानामिवकां

चनं किमत्रबहुनोक्तेनशृणुतत्वमुमेमम २ सर्वसिद्धांतसा

रोहिमन्मताश्रयिणांनृणां यथादेवेष्वहंश्रेष्टो यथात्वमनयेस्त्रि

यां ३ यथापवर्गःप्रथेषुतथाशैवमतंमम तत्रसप्तविधानांतु

वीरशैवमनुत्तमं ४ तदाश्रयाद्दतेदेविनपुंभिर्लभतेसुखं त

स्मात्सर्वप्रयत्नेनजनःशैवमतंश्रयेत् वीरशैवमतंतत्रविषेशे २०

पासमाश्रयेत् ८ इतिते कथितं देवि वीरमत्तोत्तमं आचारं
लक्षणयुतं किंभूयः श्रोतुमिच्छसि १०६ इति श्रीपारमेश्वर
तंत्रे शिवाद्वैतसिद्धांते वीरशैव दिक्षा प्रकरणे लिंगधारणस्वरू
पनिरूपणनाम पंचमः पटलः ९ ७ ७ ७

११

श्रीगणेशायनमः देव्युवाच कपर्दिन्करुणासिंधोमेरुधन्विन्म-
हेश्वर वदमेषट्स्थलज्ञानलक्षणंसकलंविभो १ ईश्वरउवाच-
शृणुदेविप्रवक्ष्यामिस्थलषट्कस्यलक्षणं यज्ज्ञात्वाज्ञायतेसद्यः-
शिवएवनसंशयः २ गोपनीयंप्रयत्नेनदरिद्रेणयथानिधिः य
थास्त्रियातथागोप्यास्वयोनिरिव ते ३ शिवभक्तिविहीनाय
दुराचाररताय च नास्तिकायनदुष्टायवक्तव्यःषट्स्थलक्रमः
४ अहमेकःपरानंदःपरमात्मासदाशिवः सृष्ट्वामायामयींश

१ त्त्विं तथाहं षड्विधोभवं ५ शैवदीक्षाकल्पवृक्षतत्फलं स्थलष
ट्कं इतिसंज्ञां विधायाहमसृजन्मुक्तिसाधनं ६ अहमेवजग
वेदसाराख्यं भुक्तिदं च विमुक्तिदं १० तद्बीजं सर्वविद्यानां मंत्रमाद्यं षडक्षरं
अतिसुक्ष्मं महार्थं च ज्ञेयं त बीजवत् ११ अहं गुणत्रयातीतः सर्वज्ञः सर्वकृ
त्प्रभुः ॐमित्येकाक्षरे मंत्रे स्थितः सर्वगतोस्म्यहं १२ प्रणवाप्यधिकस्त- १

स्य शिवस्य परमात्मनः आमिकाभक्तिरुद्दिष्टा प्रणवाभ्याससंभवा १३ शिवरू
द्राद्दिशद्वानां प्रणवद्दिपरः स्मृतः शंभोः प्रणववाच्यस्य भावना तज्जपादपि १४
यासिद्धिश्च परा प्राप्य भवत्येव न संशयः तस्मादेकाक्षरं देवमाहुरागमवादिनः
१५ वाच्यवाचकयोरैक्यं मन्यमाना मनस्विनः ज्ञायते योगिभिर्ध्यानबोधात्
द्वाव्यमाद्दयः १६ ईशानाद्यानि सूक्ष्माणि ब्रह्माण्येकाक्षराणि तु मंत्रोन्नमः
शिवायेति संस्थितानि यथाक्रमं १७ मंत्राद्यक्षरतः सूक्ष्मः पंचब्रह्मतनुः शिवः
वाच्यवाचकभावेन स्थितः साक्षात्स्वभावतः १८ वाच्यः शिवः प्रमेयत्वान्मंत्र द्दा-

चकः स्मृतः वाच्यवाचकभावोयमनादिः संस्थितस्तयोः १९ तन्त्राधिपेन

मंत्राणां सर्वज्ञेन मयाशिवे प्रणीतममलं वाक्यं नतेन सदृशं भवेत् २० सांग

निवेदशास्त्राणी संस्थितानि षडक्षरे नतेन सदृशं तस्मान्मंत्रमस्य परं क्वचित्

२१ सप्तकोटिमाहामंत्रै रूपमंत्रैरनेकशः मन्त्रः षडक्षरोभिन्नं सूत्रं वृत्यात्मनो

यथा २२ शिवज्ञानानि यावंति विद्यास्थानानि यानि च षडक्षरस्य सूत्रस्य

तानि भाष्यं समासतः २३ किं तस्य बहुभिर्मंत्रैः शास्त्रैः र्वा बहुविस्तरैः

यस्यों नमः शिवायेति मंत्रोयं हृदि संस्थितः २४ तेनाधीतं श्रुतं तेन कृतं

च्चारः सुविष्ठितः येन ॥ नमः शिवायेति मंत्राभ्यासः स्थिरीकृतः २५
नमस्कारादि संयुक्तं शिवायेत्यक्षरत्रयं जिह्वाग्रे वर्तते यस्य सफलं त
स्य जीवितं २६ अंत्यजो वाधमो वापि मूर्खो वा पंडितोपि वा पंचाक्षर ज
पे निष्ठो मुच्यते पाशबंधनात् २७ तस्मात् षडक्षरो मंत्रः सर्वसिद्धिप्रदा
यकः षडक्षरमयं देवं मां तु यो जपते भुवि २८ तस्य मुक्तिः करस्थास्या
द्धिरशैव तरस्य च शैवाश्रयं द्देवं भवतां पुंसां लिंगिनां वीरशैविनां २९ म
म पंचाक्षरो मंत्रः कल्पवृक्षो धरासुजे अस्याः परमविद्यायाः स्वरूपमति

शोभनं ३० शृणुष्व कथइष्यामि गुह्यं तत्पापनाशनं अंदौनमः प्रयोक्तव्यः
शिवायेति ततः परं ३१ एषा पंचाक्षरि विद्या प्रणवाद्याषडक्षरी सशक्तोत
स्य सर्वस्य बीजभूतः समागतः ३२ सर्वज्ञस्याज्ञयासिद्धा तत्स्वरूपार्थवाच
की तप्तचामीकरप्रख्या पीनोनतपयोधरा ३३ चतुर्भुजा त्रिनयना
बालेंदुकृतशेखरा पद्मोत्पलधरा सौम्या वरदाभयपाणिका ३४ सर्वल
क्षण संपूर्णा सर्वाभरणभूषिता सीतपद्मासनासीना नीलकुं मूर्धजा
३५ अस्याः पंचविधा वर्णाः प्रस्फुरद्रश्मिमंडलः तत्स्वरूपं हि देवेशि म

स्वरूपंनमःस्वयं ३६ पीतःकृष्णस्तथाधूम्रःस्वर्णाभोरक्तएवच
पृथक्प्रयोज्यायह्येतेबिंदुनादसमन्विताः ३७ अर्धचंद्राकृतिर्बिंदु
र्नादोदीपशिखाकृतिः बीजंद्वितीयंबीजेषुमंत्रस्यास्यवरानने ३८
दीर्घपूर्वंतुरीयंस्यात्पंचमंशक्तिमादिशेत् वामदेवोनामऋषिःपंक्तिश्छंदः
समुदाहृतः ३९ देवताशिवएवास्यमंत्रोगिरिसुतेस्यहं गोतमात्रिर्महा
देवीविश्वामित्रस्तथांगिराः ४० भारद्वाजश्चवर्णानांऋषयःक्रमशः
स्मृताः गायत्र्युष्णिगनुष्टुप्चछंदांसिबृहतीविराट् ४१ शिवोरुद्रश्च

६

हादेव ईश्वरः परमेश्वरः तेषामधीशा वर्णानां क्रमेणे ते शिवादयः

४२ शिवस्य पंचवक्त्राणि तेषां स्थानान्यनुक्रमात् पूर्वादिचोर्ध्वपर्यंतं न

कारादियथाक्रमं ४३ उदात्तः प्रथमो वर्णो द्वितीयश्च चतुर्थकः पंच

मः स्वरितश्चैव मध्यमो निगद्यः शिवे ४४ मूलविद्या शिवः शैवं सूत्रं पं

चाक्षरं तथा षडक्षरं च तस्याद्युः बामा निमुनयो मनोः ४५ हृदयं मु

लविद्येयं नकारः शंकरः शिरः शिखा मकारः कवचं शिकारो वा कृ पदन्न

यं ४६ यकारो स्त्रं नमः स्वाहा वषड्वौषट् फडित्यपि षड्भिर्वर्णैः ४

षडंगानि कुर्यान्मंत्रस्य पार्वति ४७ मंत्रवर्णादिका सेसंच मूर्तीर्यथाक्रमं
तर्जनि मध्यमो रंथानामिकांगुष्टके पुनः ४८ ताः स्युस्तसुरूषाघोरे सद्यो
वामश्च संज्ञकाः वक्त्र हृत्पाद गुह्येषु निज मूर्धनि ता पुनः ४९ प्राग्या
म्यवरूणोदिच्य मध्य चक्रेषु पंच सु मंत्राग्राणि न्यसेत् पश्चात् जातियुक्तानि
षट्क्रमात् ५० कुर्वीत गोलकं न्यासं रक्ष्यायेतदनंतरं हृद्विक्त्रांसयोरु
र्वैः कंटे नाभौ द्विपार्श्वयोः ५१ पृष्टे हृदीततो मूर्ध्नि वदने नेत्रयोर्न्यसेत्
दोष्य संधिषु साग्रेषु विन्यसेतदनंतरं ५२ शिरोवदनहृत्कुक्षि सोरूपा-

५

हृदये शिवे हृदि वक्त्रांबुजे टंके मृगाभयवरे हृदा ५३ वक्त्रांस हृत्सुपादो
रुब्जटरेषु क्रमात् सेत् मूलमंत्रस्य मंत्रार्णान्यथावद्देवि विन्यसेत् ५४
मूर्ध्नि पादादरांसेषु हृदये तान्पुनर्न्यसेत् पश्चाद् नमंत्रेण कुर्वीत-
व्यापकं सुधीः ५५ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने चतु
र्मूर्तिवपुश्छायाभासितांगाय शंभवे ५६ एवं न्यस्तशरीरोसौ चिंतयेन्मा
महेश्वरि अथ ध्यानं ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं पद्मासीनं समंतान्नु

५

लम्ममरगणे व्याघ्रकृत्तिवसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पञ्चव-
क्त्रं त्रिनेत्रं ५७ एवं ध्यायेन्महादेवि प्रसन्नविमलाशयः दैव्यश्च मूल
मंत्रोयं किंचित् भेदं समन्वयात् ५८ तत्रास्य प्रथमे वर्णे द्वादशस्वरभूषि
तः तस्माद्देनेन मंत्रेण मनोवाक्कायभेदतः ५९ अनयोरर्चनं कार्यं
जपहोमादिकं प्रिये यथाश्रद्ध यथाप्राज्ञं यथाकालं यथास्मृतिः ६०
यथाशक्तिस्तु संपाद्य यथायोगं यथारतिः यदाकदापि वा भक्त्या यत्र कु
त्रापि वाकुला ६१ येनकेनापि वा देवी पूजा मुक्तिं हि नेमेष्यति सदास

६ न्के मनसानेन कृतं परमेष्ठिनः ६२ यद्वियं च शिवस्यैव क्रमेण व्युत्क्रमेण
वा तथापि शिवभक्ताये नायं न विवशा नरः ६३ तेषामर्थे मयादेविनि
यमः परिकल्पितः तत्रादौ संप्रवक्ष्यामि तत्र संगृहणं शुभं ६४ यदि-
ज्ञानिष्फलं जप्यं यन वास फलं भवेत् आज्ञाहीनं क्रियाहीनं श्रद्धाभक्ति
विवर्जितं ६५ अजस्रं दक्षिणाहीनं सदाजप्तं च निष्फलं आज्ञासि
द्धं श्रद्धासिद्धं क्रियासकं ६६ तथैव दक्षिसिद्धं जपसिद्धं महत्फलं
तस्माद्गुरुमुपागम्य तोषयेत्तं प्रयत्नतः ६७ वाचा च मनसा चैव कायेन ६

द्रविणेन च आचार्यं पूजयेच्छिष्यः सर्वदा देवि यत्नतः ६८ हस्त्यश्वरथरत्नानि
क्षेत्राणि च गृहाणि च वासांसि धनधान्यानि रत्नानि विविधानि च ६९ सर्वं तद्
गुरवे दद्याद्धत्याच विभवे सति वित्तशाठ्यं न कुर्वीयदि च्छेसिधिमात्मनः ७०
तस्मान्निवेदयेद्देवि स्वात्मानं सपरिच्छदं एवं संपूज्य विधिवद्यथाशक्ति स्ववंच
यन् ७१ साधयेत् गुरोर्मंत्रज्ञानं देवि विक्रमेण तु षडध्वशुद्धिमार्गेण सनकु
र्याद्दासजिगीषया ७२ ज्ञात्वा गुरुमुखात् सम्यग्ज्ञानार्णवमुत्तरेत् कलात
त्वाध्वभुवनं वर्णं पदमतः परं ७३ मंत्रं चेति समासेन षडध्वानः प्रकीर्तिताः

८ देवितुष्टो गुरुः शिष्यं पूजकं वत्सरोषितं ७४ अभिषिंच्य स्वलंकृत्य दद्यान्मंत्रं
शिवात्मकं यो मंत्रमेनमधिगम्य गुरोर्मुखाम्बुजात् कृत्वा षडध्वपरिशोधनपूर्वं
र्यो ध्यात्वा जपत्यनुदिनं विषयेष्वसक्त स्तस्याचिरेण परितुष्यति चंद्रमौलिः
७५ सा भाषिकां गुरोर्लब्ध्वा मंत्रदीक्षांच गौरवीं संकल्प्य प्रजपेद्देवि पुरश्च
रणपूर्वकं ७६ एकाग्रेण शिवं ध्यात्वा चेलसा विजितेंद्रियः यावज्जीवं
जपेन्मंत्रमष्टोत्तरसहस्रकं ७७ अनश्नन्नूतहरो भूत्वा सयाति परमां ग
तिं जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ७८ नक्ताशी संयतमनाः पो ८

रश्चरणिकामतः तत्पुरश्चरणं कृत्वा नियज्जापी भवेन्नरः ७९ तस्यना
स्ति समो लोके ससिद्धः सिद्धिदो भवेत् स्नानं कृत्वा शुचौ देशे लब्ध्वा रुचिर
मासनं ८० शिवभक्त्या शिवं ध्यात्वा स्वगुरोः सन्निधौ हृदि उदङ्मुखो वाभी
नीचैकाग्रमानसः ८१ विशोध्य पंचतत्वानि दहनप्लावनादिभिः मंत्रन्या
सादिकं कृत्वा सकलीकृतविग्रहः ८२ आवयोर्विग्रहं ध्यायेत् प्राणाया
मौ नियमुच्चेर्म्य विद्यास्थानं परं रूपमृषिं छंदश्च दैवतं ८३ बीजं शक्तिं
तथा वाच्यं स्मृत्वा पंचाक्षरं जपेत् उत्तमं मानसं जप्यमुपांशु मध्यमं विदुः
८४

९ अधमं वाचकं प्राहुरागमार्थविशारदाः उत्तमं रुद्रदैवत्यं मध्यमं विष्णुदै
वतं १५ अधमं ब्रह्मदैवत्यं इत्याहुरनुपूर्वशः यदुच्चनीचस्वरितैः शब्दैः
स्पष्टपदाक्षरैः १६ मंत्रमुच्चारयेद्वाचा वाचकोयं जपः स्मृतः जिह्वामा-
त्रपरिस्पंदं ईषदुच्चारितं शिवे १७ अपरैरश्रुतं किंचित्स उपांशुरु-
च्यते धीयाय दक्षरश्रेणिवर्णाद्वर्णपदात्पदं १८ शब्दार्थचिंतनं देवि क
थ्यते मानसो जपः वाचकं चैकमेकं स्यादुपांशुः शतमुच्यते १९ सह
स्रो मानसः प्रोक्तः सगर्भस्तद्दशाधिकः कुंभकेन समायुक्तः सगर्भोज ९

पउच्यते ९० अद्यंतयोरगर्भेपिप्राणायामःप्रशस्यते चत्वारिंशत्स
मावृत्तिःप्राणानायाम्यसंस्मरेत् ९१ मंत्रंमंत्रार्थविधिमानशक्तिःश
क्तितोजपेत् अगर्भोवासगर्भोवासगर्भस्तत्रशिष्यते ९२ सगर्भाद्दवि
साहस्रःसध्यानोजपउच्यते एषुपंचविधेष्वेकः कर्तव्यः शक्तितोजपः
९३ अंगुल्याजपसंख्यानोमेकमेकमुदाहृतं रेखयाष्टगुणंविंद्यात्पुत्रजी
वैर्दशाधिकं ९४ शतंस्याच्छंकमणिभिःप्रवालैस्तुसहस्रकं स्फटिके
र्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते ९५ पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरु

च्यते कुशग्रंथ्यां च रुद्राक्षैरनंतगुणितं भवेत् ९६ त्रिंशदक्षैः कृतामा
ला धनदा जपकर्मणि सप्तविंशति संख्यातैरक्षैः पुष्टिप्रदा शिवे ९७ पं-
चविंशति संख्यातैः कृता मुक्तिं प्रयच्छति अक्षैस्तु पंचदशभिर चारफल
प्रदा ९८ अंगुष्ठं मोक्षदं विंद्यात् तर्जनी शत्रुनाशनी मध्यमा धनदा नाशं
कुरुते नामिका जपात् ९९ कनिष्ठिका रक्षणी प्रोक्ता पुत्रदा च विशेषतः
अंगुष्ठेन जपाज्जाप्यः सहान्यंगुलिभिः सदा १०० अंगुष्ठरहितं जाप्यं कृ
तं तद्रफलं भवेत् जप्त्वा गृहे सम फलं गोष्ठे शतगुणं विदुः १ पुण्यारण्ये त

धारामे सहस्रगुणमुच्यते अयुतं पर्वते देवि नद्यां लक्षमुदाहृतं २ कोटिर्दे
वालये देवि अनंतं शिवसन्निधौ सूर्यस्याग्रे गुरोरग्नेर्दीपस्य च जलस्य च ३
लिंगस्य च गवां चैव सन्निधौ शस्यते जपः पुमान् सदाचाररतो जपेद्वा चाक्ष
रीमिमां ४ अस्मिन्सिद्धे महामंत्रे सर्वसिद्धा गिरिंद्रजे योजनः कीर्त
येद्भक्त्या शृणुयाद्वा समाहितः ५ सर्वपापविनिर्मुक्तः स याति ममसन्नि-
धिं द्विसहस्रं जपेद्रोगान्मुच्यते नात्र संशयः ६ त्रिसहस्रं जपेन्मंत्री दीर्घ
मायुरवाप्नुयात् सहस्रवृध्या जपेत्सर्वान् कामानवाप्नुयात् ७ अन्यान्वि

१० तैस्तिलैः शुधैर्जुहुयाल्लक्षमादरात् ७ स्नातजनितान् क्लेशान् नाशयेत्सर्वता
मुने ८ शतलक्षं जपेत्साक्षाच्छिवो भवति मानवः किमत्र बहुनोक्तेन मम-
रूपं स पार्वति ९ पंचाक्षरीं नियमवाननपि यो जपेत् तस्मिन् समाहितम
नाः शुचिरात्मवश्यः क्षेत्रे शिवस्य परमे भुवि पर्वते वा गच्छेत्स शंशंकरपुरं
शिवसन्निकाश १२ इति ते कथितं देवि मनोर्माहात्म्यमुत्तमं मम पंचाक्षर-
स्यैवं किं भूयः श्रोतुमिच्छसि १३ इति श्रीपारमेश्वरतंत्रे पंचाक्षरिजपानुष्ठा
न स्वरूपनिरूपणं नाम एकादश पटलः ११ ॥ ॥ ॥ १०

श्रीगणेशायनमः श्रीदेव्युवाच देवेश्वमाहादेवमहेशमृडशंकर ज्ञान
योगस्य महात्म्यं वदमेकरुणाकर १ ईश्वरउवाच चर्याचर्याच्चसततमहिंसा
ज्ञानसंग्रहं सयमस्त्येयमास्तिक्यं श्रद्धाचेंद्रियनिग्रहं २ आध्यापनंचा
ध्ययनं यजनं याजनंतथा ज्ञानमीश्वरभावश्चयजनंयाजनशिवे ३
अंतर्यागं बहिर्यागंसततं ज्ञानशीलता यएवंवर्तते योगी ज्ञानयोगस्य
सिध्यये ४ अचिरादेव विज्ञानं लब्ध्वा योगं चविंदति दग्धदेहमिमंज्ञा
नीक्षणतु ज्ञानाग्निनानयेत् ५ ममप्रसादाद्योगज्ञः कर्मबंधं महास्यति

१ पुण्यापुण्यात्मकंकर्मसुक्तेस्तस्यातिबंधकं ६ तस्माद्योगरतोयोगीपुण्या
पुण्येविवर्जयेत् फलकामनयाकर्मकरणंप्रतिबध्यते ७ नकर्ममात्रकर
णंतस्मात्कर्मफलंत्यजेत् प्रथमंकर्मयोगेनबहिःसंपूज्यशंकरं ८ ज्ञान
यज्ञरतोदेवितस्माद्योगंसमभ्यसेत् विरक्ताश्चशिवासैक्यंतेवकर्मणा
ज्ञानयोगिनः ९ नयजंतिशिवंयुक्ताःसमलोष्टकांचनाः निस्पृमु
क्तामहांदविभक्तिमान्यःसमहितः १० ज्ञानयोगरतोयोगीममसा॰
युज्यमाप्नुयात् अथाविरक्तचित्तायवर्णिनःशिवमाश्रिताः ११ ज्ञान १

चर्येक्रियाख्यवतस्मिन्कुर्यस्तदादृतः बाह्यमभ्यंतरंचैवबाह्याभ्यंतर
मेवच १२ वाङ्मनःकायभेदेनत्रिधातद्भजनंविदुः तपःकर्मजपो
ध्यानंज्ञानंचेत्यनुपूर्वशः १३ पंचधाकथितंरुद्रेतदेवकथितंपुनः
अन्यात्मविदितंबाह्यंबाह्यमभ्यर्चनादिकं १४ तदेवतुस्वसंवेद्यंनम
नोमात्रमुच्यते शिवनामरतावाणीयासावाणीनिगद्यते १५ लिंगे
स्तच्छासनोद्दिष्टैस्त्रिपुंड्रादिभिरंकितः शिवोपचारनिरतःकायःका
नचेतरः १६ तदर्चाकर्मविज्ञेयंबाह्ययागादिनोच्यते शिवार्थदेहसं

२ शोषनपः कृच्छ्रादिनो मतं १७ जपः पंचाक्षराभ्यासः प्रणवाभ्यास एव च
रुद्राध्यायादिकाभ्यासो न चान्याध्ययनादिकं १८ ध्यानं च शिवचिंता स्यादा
त्माद्यर्थसमाधयः शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनं १९ बाह्ये
थवाभ्यंतरं श्रेष्ठं भवेच्छ्रतगुणाधिकं असंकरत्वात्स्पृष्टानां दोषाणामसं-
संभवात् २१ शौचमभ्यंतरं कुर्यान्न बाह्यं शौचमुच्यते ततः शौच्यवि
मुक्तात्मा शुचिरप्यशुचिर्यतः २२ अष्टधा बाह्यमभ्यंतरं चैव भजनं भाव
पूर्वकं नभावरहितं माह्यं विप्रलंभैककारणं २२ अष्टधा लक्षणं प्रा २

कुः शिवधर्माधिकारिणां येन ज्ञेया नरेरन्ये नरा विश्वविलक्षणाः २४
कुलकृत्स्यस्य नृसहस्य शिवस्य परमेष्ठिनः नकेः किं क्रियते कर्मभावमात्रं हि
गृह्यते २५ शिवभक्तेषु वात्सल्यं पूजायां चानुमोदनं स्वयमभ्यर्चनं चै
व तदर्थं चांगचेष्टनं २६ तत्कथाश्रवणे भक्तिः स्वरनेत्रांगविक्रिया शिवा
नुस्मरणं नित्यं सर्वथा तदुपैकेतत्वं २७ तदष्टगुणं चिह्नं यस्मिन् म्लेच्छेपि दृश्य
ते स शैवेंद्रो यतिः श्रीमान् स श्रेष्ठ विप्रश्च पंडितः २८ सहानुभावया सेवा सा
भक्तिरिति कथ्यते सा पुनर्विद्यते धा मनो वाकायभेदतः २९ पराभक्तिं समभ्य-

२ स शिवधर्मरतोनरः परयाचतयाभक्त्याप्रसादंलभतेनरः २० देवावामान
वोवापिपशुर्वाविहंगोपिवा कीटोवाक्रिमिर्वापिमुच्यतेमत्प्रसादतः २१ ग
र्भस्थोजायमानोवाबालोवातरुणोपिवा वृद्धोवाम्रीयमाणोवास्वर्गस्थोवापिना
रकी २२ पतितोपनितोवापिपंडितोमूढएवच प्रसन्नेमयिदेवेशिमुच्यते
भवबंधनात् २३ अथमेमानवालोकेस्वेछयाधृतविग्रहाः भावातिशय
संपन्नाःपूर्वसंस्कारसंयुताः २४ विरक्तावानुरक्तावास्त्रियादिविषयेष्वपि
पापैर्नतेविलिप्यंतेपद्मपत्रमिवांभसा २५ तेषांशिवात्मविज्ञानंविशुद्धा २

नां शिवात्मानां मत्प्रसाद वियुक्तानां दुःखमाश्रमं लक्षणं ३६ नास्तिकृ
यमकृ संच समाधि विपर्ययणं नविधिर्न निषेधश्च ममसाम्यः सचाद्वीजे
३७ यथैव परिपूर्णस्या साध्यं मम न विद्यते तथैव कृतकृत्यानां तेंमपि न सं बा
शयः ३८ शिवभक्त हितार्थं ते मानुषं भाव माश्रिताः रुद्रलोकाः सरि
भ्रष्टाख्य रुद्रानात्र संशयः ३९ शिवानुशासनं यद्वद् ब्रह्मादीनां प्रवर्तं
कं तदुत्तरेषामन्यषां तन्नियोगः प्रवर्तकः ४० यथा वह्नि समावेशाद
योभवति केवलं तथैव शिवसान्निध्यान्मतेकेवलमानुषाः ४१ यतस्तया

४ दिसाध्यैरुद्रधर्मवपुर्धरात्‌ प्राकृतान्येव मन्वानो नावजानीत पंडितः
४२ आवज्ञानं कृतं तेषां नरैर्वा मूढमानसे आयुः श्रियं कुलं शीलं हत्वा
निरयमाहवेत्‌ ४३ ब्रह्माविष्णुमहेंद्राणामपि तूलायते पदं शिवाद्न्य
दुपेक्षाणामुत्तमानां महात्मनां ४४ शिवज्ञानवतां पुंसां मुक्तिस्तस्य करां
बुंजे साहानिस्तन्महच्छिद्रं समोहस्सो धमोरिपुः ४५ ततोदयान्यत्र
कार्यामोक्षमार्गबहिष्कृते ज्ञानं क्रियाच चर्याच योगश्चेति धरासजे
४६ चतुष्पथः समाख्यातश्शिवधर्मस्सनातनः पशुपाशपतिज्ञानं ४

ज्ञानमित्यभिधीयते ४७ षडध्वशुद्धविधिना गुर्वादीनां क्रियोच्यते
वीरशैवप्रयुक्तस्य शिवेन विहितस्य च ४८ लिंगार्चास्यैदेः स्वधर्मस्य
चर्याचर्येति कथ्यते तदुक्तेनैव मार्गेण शिवसुस्थितचेतसः ४९ वृसंत
रनिरोधोयं सयोग इति कथ्यते अश्वमेधशताद्धृष्टंदे विचित्तप्रसादतः
५० मुक्तिदं च तदाप्येतदशक्तं विषयैषिभिः विजितेंद्रियवर्गस्य य
मेन नियमेन च ५१ सर्वपापहरो योगी विरक्तः शैव कथ्यते वैराग्या
ज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्तते ५२ योगज्ञः पतितो वापि मुच्यते -

५

नात्र संशयः शिवज्ञानं समासाद्य परं शिवमथाश्नुते ९३ यश्चातीव शिवे
भक्तो विषयोपरतोपि सन् शिवधर्मान्न कुर्याद्यो सदोषेणैव लिप्यते ९४ आ-
र्चयेदंबिकानाथं सर्वगं सर्वहेतुना ममधर्मेरतो देवि श्रेयसि चेत्कृतोद्यमः ९५
पंचाक्षरमनुं नित्यं भावयेच्छिववाचकं भुक्तिमुक्तिप्रदं दिव्यं प्रणवं च परं शि-
वं ९६ पंचाक्षरमयीं विद्यां जपन्नेकाग्रमानसः प्रणवं जापयामास शं-
करं सम्यगर्चयेत् ९७ साश्वमेधसहस्रस्य साधिकस्य महेश्वरि ल-
भते सुमहत्पुण्यं महल्लब्ध्वा भ्रष्टाचारोपि लिंगवान् शिवभावं समाश्रीय ५

शिवयोगमथाचरेत् ब्रह्माद्यास्स्थावरांत देवदेवस्य शूलिनः ६० प
शवः परिकीर्यंते संसारपरिवर्त्तिनः तेषां पतित्वाद्देवे शिवो हं पशुपतिः स्मृ
तः ६१ मायामलादिभिः पाशैर्बध्नाति स पशून्पतिः स एव मोचकस्ते
षां भक्त्या सम्यगुपासितः ६२ चतुर्विंशति तत्वानि मायाकर्म्मगुणा अपि विष
या इति कथ्यंते पाशा जीवनिबंधनात् ६३ ब्रह्मादिस्तंभपर्यंतान् पशून्
बध्वा महेश्वरि पाशैरेतैः पतिश्चाहं कार्यकारयति स्वकं ६४ इंद्रिया
ण्यपि तस्यैव मदाज्ञा वशगानि तु कारयंति नरं कार्यं वशं च स्वेच्छया पशून्
६५

६ तस्मात् पशुपतिं मां तु ज्ञात्वा लिंगार्चकः शिवे छित्वा पाशान विद्याथानुप
रं निर्वाणमृच्छति ६६ भुक्तिमुक्तिप्रदो देवी पशुत्वविनिवर्तकः पूज-
नीयः सदाचार्यं यथाश्रद्धं यथाविधि ६७ यः कुर्याद्दांतिकीं दीक्षामादेहां
तमनाकुलः वीरशैवं प्रकुर्वीत स वै नैष्ठिक उच्यते ६८ सोंसाश्रमी च-
विज्ञेयो माहामाहेश्वरः शिवः सएव तत्वांश्रेष्ठः सएव हि महाव्रती ६९
नतेन सदृशाः कश्चित्कृतकृत्यो मुमुक्षुषु आदेहांतमियः दीक्षा महापात
कनाशिनी ७० कृतकृत्यश्च निष्कामो यश्चरेद्वीरशैवगः शिवोपि ६

तात्मा सततं नतेन सदृशः क्वचित् ७१ यः पश्येद्धि रशैवस्थं ब्रह्महत्यादिसं
भवैः पापैः विमुच्यते सद्यो मुच्यते च भवार्णवात् ७२ शिवाग्नेर्यत्परं वीर्यं
वीरशैविनः तस्मात्सर्वेषु कालेषु वीर्यवान् छिवमर्चयेत् ७३ वेद एव द्विजा
तीनां स्त्रीणां च स्वपतिर्यथा सन्यासिनां ज्ञानमेव शैवानां वीरशैवकं ७४
यथा सर्वेषु देवेषु अधिको मेघवाहनः तस्यासीदधिको ब्रह्मा सतस्मादधि-
को हरिः ७५ विष्णवादीनां च सर्वेषामधिको हं परः शिवे मतः परतरं
नास्ति मन्मतं तु तथैव हि ७६ क्रिमीकीटपतंगेभ्यः पशवः प्रज्ञयाधिकाः

७

पशुभ्योपि नराः श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः ७७ द्विजाति ष्विकाविप्रा वि
प्रेषु क्रतुबुध्धयः क्रतुबुध्विबुकर्तारस्तेभ्यः सन्याशिनेष्वि ७८ तेषु विज्ञा
निनः श्रेष्टास्तेषु शंकरपूजकाः तेषु श्रेष्टा महादेविममलिंगांगसंगिनः
७९ लिंगांगसंगीष्वधिका मम या गरता नराः तेषु श्रेष्टा महाद्वीरशैव-
दिक्षापरानराः ८० तेषामप्यधिकोनास्ति त्रिषु लोकेषु शैलजे मतः
परतरं नास्ति मन्मतं तु तथैवहि ८१ अहमेव हि देवेशि विरमाहेश्वरोन
राः महासंयतेंद्रियः सत्वोहं शिवो महेश्वरः शंभुः पिनाकी चपिता

७

महः संसारवैद्यः सर्वज्ञः परमात्मेयमुं मनुं जपेन्नियमवान्नित्यंयो
नरः संयतेंद्रियः सएवाहं महादेवि मन्नामस्मरणात्सदा ६२
शिवः शंभुःशिवः शंभुः शंभुः शिवः शिवः इतिव्याहरतेनित्यंदिवा
न्यायांतु मांतुमे ६३ इमंमनुंवदेद्देवि ममलिंगांगसंगिनः शृणु
देविप्रवक्ष्यामितवस्नेहाद्वरानने ६४ नकर्मणानतपसानजपै
र्नसमाधिभिः नदानेन नचान्यनवश्योहं श्रद्धयाविना ६५ य
स्यश्रद्धास्तिदेवेशि एनकेनापिहेतुना तस्यवश्योसदादेवियोगिनां

६ वीरशैविनां ८६ वंद्यः स्पृश्यश्च दृश्यश्च पूज्यः संभा एवच साध्या-
तस्मासदा श्रद्धा तस्या वश्यो भवाम्यहं ८७ श्रद्धा मम ममस्वस्य मयिभ
क्तिः प्रजायते तस्यैव भवति श्रद्धा मयि नान्यस्य कस्यचित् ८८ अ
न्नाय शिखो निखिलो धर्म आश्रमिणामिह ८९ ब्रह्मणा कल्पितं पुर्वंत
न्ममाज्ञापुरःसरं सतुपेता महाधर्मविद्धुमिश्च क्रियान्वितः ९०
कर्मणा महता श्रद्धां प्राप्य शैवीं सुदुर्लभां माहेश्वराः प्रपद्यंते देवि मां
भक्तिसंयुताः ९१ तेषां सुखेन मार्गेण धर्मकामार्थमुक्तये मयिभ ६

क्तिवतांमेवलिंगीनां वीरशैविनां १२ अधिकारोनचान्यषामित्याज्ञामाम
कीदृशा हृदयेसततंशंभुं सर्वकारणकारणं १३ ध्यात्वाभावविधानेन-
पूजयन्मामहेश्वरि भक्तिंस्फ निश्चयात्कृत्वामयिचानन्यभावतः १४
सर्वावस्थ्यपीमुच्येतयथ्यापिनयभावनात् सामान्यमपिवक्ष्यामिसदा-
चारंतुशैविनां १५ येनसर्वप्रपद्यंतेभक्तिमव्यभिचारिणीं त्रिकालं
भस्मनास्नानंलिंगार्चनमनुत्तमं १६ जपमीश्वरचिंताचदयासर्वत्र
सर्वदा सत्यंसंतोषमास्तिक्यमहिंसासर्वजंतुषु १७ ह्रीश्रद्धाध्ययनं

९ योगः सदा पंचाक्षरिजपः व्याख्यानं शिवशास्त्रस्य श्रवणं च तपः क्षमा

९८ निषिद्धवर्जनीयं च भस्मरुद्राक्षधारणं सोमवारार्चनं देविप्रदोषा

च विशेषतः ९९ असंत्यागः क्रियाणां च श्राद्धान्नस्य विवर्जनं तथाप

र्युषितान्नं च गणिकान्नं विशेषतः १०० गणिकाशब्दस्यार्थः स्वगोत्रे र-

मते यस्तु स विप्रो गण उच्यते गर्भपालनशीला या सा नारि गणिका स्मृता

१ मध्यस्य मध्यगंधश्यानैवेद्यस्य च वर्जनं सामान्यः सर्ववर्णानां विशेषा

वीरशैविनां २ क्षमा शांतिश्च संतोषो सत्यमस्तेयमेव च ब्रह्मचर्यं सम

ज्ञानं वैराग्यं भस्मसेवनं ३ सर्वसंगनिवृत्तिश्च द्वेशेतानि विशेषतः स
र्वे लिंगमयं ध्यायेज्जगदेतच्चराचरं ४ कथितं तु मया देवि वीरमाहेश्वरा
गमं पंचाक्षरस्य माहात्म्यं सविधानं सविस्तरं ५ कर्मयोगज्ञानचर्या
ज्ञानयोगं समं प्रिये चर्याचर्या मया प्रोक्तं किं भूयः श्रोतुमिच्छसि ६०६
इति श्री पारमेश्वर तंत्रे ज्ञानयोगस्वरूपनिरोपणं नाम द्वादशः पटलः

१०

श्रीगणेशायनमः श्रीदेव्युवाच करुणामृतकल्लोल करास्तगणनायक कैवल्यकलशाधर नमस्ते गिरिधन्वने १ कथितं च रहस्यं तद्धि शैवाभिधं मतं श्रुतं वाधिगतं देव मतभेदसविस्तरं २ स्थानभेदान्ममाचक्ष्व करपीठादिलक्षणान् तारतम्ये न वा किंनु फलं तत्तत्स्थलादिषु ३ यदि वर्हि समं किंवा विशेषस्तत्र कथ्यतां ४ ईश्वर उवाच शृणु नान्यमना देवि रहस्यार्थमनाकुलं गोपनीयं प्रयत्नेन यस्मै कस्मै न देयं तत्त्वयि ५ बहूनि संलिपिठानि लिंगस्याराधने मम तार मनसर्वाणि ज्ञानदानि न संशयः ६

१ भक्तस्य सकलं पीठमज्ञस्य मम योगिनः पाणिपीठमहं लिंगं जगदेतच्चराच
रं ७ आरूढस्यैवमुचितं वीरशैवस्य लिंगिनः यथारूढस्यैरीशानी हृदयं
पीठमुच्यते ८ अथोच्यते बहिःपीठं तत्तोन्युनाधिकारिणः लिंगस्य नित्यपू-
जायां करपंकजमादितः ९ स्ववामहस्तं देवेशि विभाव्य कमलाकृतिं लिंगं
तत्कर्णिकामध्ये प्रतिष्ठाप्यार्चयेत्सदा १० तदेतत्करपीठाख्यं चतुर्वर्गफलप्रदं
ततोन्यद्दारुजं शैलं लोहं मार्त्तिकमेव वा ११ अजिनं कंबलं वासः पर्णभूमितृ
णादिकं यत्र संस्थाप्यते लिंगं तत्पीठं तत्र भावयेत् १२ दारुपीठं दरिद्रा १

यशो लं पुत्रधनाप्तये कोहं सर्वार्थसंसिध्येमार्चिकज्ञाननाशनं १३ आजिनं
व्याधिपीडायेकंबलं दुखसिद्धये वासः सर्वसुखप्राप्तेपर्णस्वर्णफलायमे १४
भूमिः सर्वार्थनाशाय तृणं विप्लवकारणं तत्र सर्वोत्तमं देवी पिठार्थं करपंकजं
१५ तत्स्वरूपं विशेषणह्याकर्णयवरानने स्ववामहस्तं कमलं ध्यात्वा पं
चदलं शुभं १६ पंचांगुलीः पंचदलं कर्णीकरतलं तथा रेखा हस्तग
ताः सर्वा ध्यायेत्कमलकेसरान् १७ पंचांगीषु देवेशि पंचब्रह्मानुवाक-
कैः पंचब्रह्मात्मनो ध्यायेत्कर्णिकायां गिरींद्रजां १८ अंगुष्ठादिकनिष्ठं

तं प्रादक्षिण्येन सुंदरी गार्हपत्यं दक्षिणाग्निमध्यमाहवनीयकं १९
सव्यापसव्याक्रमशः पंचाग्नीन्भावयेत्सुधीः शिवस्य पंचवक्त्राणि ध्या-
येत्संचांगुलीः शिवे २० आरभ्य पूर्वमींद्रादिन् ध्यायेदष्टसु चाप्यपि
दुर्गां महेश्वरीं चंडी भद्रकालीमिति क्रमात् २१ प्राणादिषु चतुर्दिक्षु प्रा
दक्षिण्येन भावयेत् गणेशं बटुकं वीरभद्रं चंडं तथार्चयेत् २२
नंदीशं रिटिनं भृंगिं तंडुं प्रमथनायकं २३ अग्नि ईशासुरवातेषु वि
दिक्षु च विभावयेत् २३ अंतरे ह्यारइशादिस्थान् ॥ महान्नवतथा निधि

नू श्रीशैलमुख्यांश्च गिरिनू क्षेत्रं काशादिकं तथा २४ गंगाद्या-
स्सरितः सर्वाः कल्पवृक्षादिकांस्तरून् चिंतामणिं कामधेनुं नक्षत्रा
णि दिशोदशः २५ ऋग्यजुः सामवेदांश्च वर्णांश्च पुराणकं सहेति
हासं चिंत्य यद्देदं तसं च मोमत्तः २६ मिमांसादिद्वितयं तर्कसां-
ख्ययोगौ विशेषकं धर्मशास्त्राणि संचिंत्य तन्मध्ये लिंगमर्चयेत् २७
आरभ्य कर्पूरं यावन्मणिबंधं कुलेश्वरि नालं तस्याणि पद्मस्य पंचपत्र
स्य भावयेत् २८ सर्ववेदात्मकं पद्मं सर्वक्षेत्रमयं शुभं सर्वसौभाग्यज

नकं यसीठं करपंकजं २९ यन्मूनमतिरिक्तं वा पूजायाम मयोगीनः करपं
कजपूजायां तत्सर्वं सांगमेवहि ३० उद्धयसज्जिका द्वाराकरपंकजमध्य
गं लिंगं कृत्वार्चयेल्लिंगी लक्षणेन नच पाणिना ३१ आदौ विभाव्य कमलं
पाणिं पंचदलं शिवे पूर्वोक्त लक्षणं योगी मध्ये मूलं जपेत्ततः ३२ सह
स्रं वा यथाशक्ति तत्र सिंहासनं स्मरेत् तत्र मांस सुखासीनमभिध्यायेत्
त्वयासह ३३ ध्यानावाहनमारभ्य यावल्लिंगविवर्जनं तावत्करस्थि
तं कुर्यात्करपद्मार्चने विधिः ३४ अभिषेके च पूजायां यावद्भक्ति यथाब

लं यावद्विसर्जनं लिंगं निवसेत्करपंकजे ३६ प्रदक्षिणनमस्कारोनमस्य
वाचरेत्सुधीः नोतिष्ठेन्नक्वचिद्गच्छेद्यावल्लिंगविसर्जनं निक्षिप्यसज्जि-
कामध्ये बध्वासारपमर्गलं ३७ विधायवसनग्रंथिं जप्त्वामूलंशतंपु
नः ३८ नभवेद्यावदेतावन्नोतिष्ठेत्तावदीश्वरी श्रीगुरावागतेवापिवह्य
मानेपिवागृहे ३९ यदुत्तिष्ठेच्छिवमध्ये धृत्वालिंगंकरेमम सद्रोहीमम
विज्ञेयोगुरुद्रोहीनसंशयः ४० तस्माद्विजनेमाश्रित्य निराकुलमनाःस
दा यथासंभाविताभक्त्या दर्चेल्लिंगंकरांबुजे ४१ विभावयेदधः कु-

४ र्ममष्टदिक्ष्वष्टदिग्गजान् मध्येशेषंमहाहींद्रंसहस्रफणिमंडलं ४२
लिंगंविश्वासकंध्यायेदादिमध्यांतवर्जितं भक्त्याव तोभक्तपाणीपं
कजसंस्थितं ४३ सहस्रघटतोयेनत्वष्टोत्तरशतेनवा चतुषष्टि
घटेनापिद्वात्रिंशताघटैः ४४ चतुर्विंशतिभिर्वापि षष्ठ्याद
शभिस्तथा आष्टभिर्पंचभिर्द्वाभ्यामेकेनापिघटेनवा ४५ सह
स्रघटतोयेनशतमष्टघटैःकरं चुलुकोदकमात्रंवालिंगस्योपरि
निक्षिपेत् ४६ यावच्छक्तियथाभक्तिगंधवस्त्रुधतोयतः शो- ४

धितेनातिशीतेन लिंगं समभिषेचयेत् ४७ शंखेन खड्गपात्रेण
स्वर्णे क्तिकयापिवा अपि लोहेन पात्रेण पर्णेनान्यन केनचित्
४८ सर्वाभावे महादेवी दक्षिणे नैव पाणिना अभिषिंचे यथाशक्ति श्रे
ष्ठ पात्रं विभावयन् ४९ सहस्रप्रभृति देवि सहस्र घट संमता मम
लिंगाभिषेकार्थं पुनर्भावनया श्रयः ५० यावतिः पयसा भक्त
र्पयेल्लसृतिर्मम तावदब्धि सहस्राब्धेरभि क्तोस्म्यहं शिवे सर्वा
देवात्मकं तोयं सर्वतीर्थमयं भं तेनाभिषिच्य मां भक्त्या कोवाहं नभ

९ वेह्रिवे ९२ शीतलंलघुसद्गंधंशानधावस्यशोधितं तेनाभिषिच्य-
मांभक्त्यानशिवस्तेत्रकोभवेत् ९३ भूमिष्टमुक्ष्कतात्पुण्यंततःश्रव-
णोदकंततस्तुसारसंतीर्थंमहानद्यास्ततोधीकं ९४ ततोगंगाज
लंपुण्यंगंगासागरसंगजंतत्रलब्धेनपयसाभिषंचेन्मांप्रयत्नतः ९५
ध्यानंचद्रोणबिल्वंचविशेषःकरपंकजं घंटानादंचशंखंचप्रतिक्षिप्या
म्यहंसदा ९६ दशांगधूपंकर्पूरदीपंयत्नेनन्याये तु जपस्तोत्र
प्रणामादिपाणिलिंगैःसमाचरेत् ९७ एवंहिनियमोदेवियदिव्यापा ९

णिपंकजे पूर्वांकर्तुर्नचोत्तिष्ठेद्यावल्लिंगंविसर्जनं ५८ तत्रानुपा
देर्निश्चित्य पूजयेत्साणिपंकजे यद्यन्यत्र समुत्तिष्ठेद्यथा विघ्नस्तदा-
शिवे ५९ निरंतरायमासाद्यशोषतन्त्रसमापयेत् अन्यथाचेत्कृतभं
गः स्याद्रौरवंनरकंव्रजेत् ६० आरभ्य पूजांलिंगस्य समासेरूपवे
सने अशक्तः उत्थितोमध्ये रौरवंनरकं व्रजेत् ६१ सर्वसामग्र्य-
भावेपिविक्षिप्यकरममं लिंगंवामदक्षिणे। नाभिःषिंचेभक्तितोंभसा
६२ शक्तस्तुनियमंकृत्वा वर्षमेकंत्रिकालतः नियमुक्तप्रकारेणा-

६ भिषिंचेसाणिनांभसाः ६३ विभाव्यघटसाहस्रंसहस्रप्रसृतिरपि
अधःशायिब्रह्मचारिसःस्वप्नेमांविलोकयेत् ६४ सज्जिकायाःश
तगुणमपनीतकपाटकं तत्सहस्रगुणंभूमौवस्त्रपीठादिषुक्रमात्
६५ ततःशतगुणंप्रोक्तंपट्टवस्त्रार्चनंमम तत्सहस्रगुणंपिस्वर्ण टे
मणिमयंतथा ६६ अनंतगुणीतंवाणिपंकजेममपूजनं ज्ञात्वा
गुरुमुखात्सम्यक्पाणिपद्मेसमर्चयेत् ६७ यद्यन्यथाप्रमादःस्या
दाफब्यस्यक्षयोभवेत् नांगीकरोतितत्पूजांसर्वकृत्परमेश्वरः ६८ ६

प्रवृत्तिमपिधर्मार्थे निवृत्तिमितरस्य च ज्ञात्वा गुरुमुखात्सम्य क्
यथाशास्त्रं समाचरेत् ६९ यथायोग्यमुमेलिंगं यथा पंचाक्षरिम
नुः यथैव श्रीगुरोर्नाम तथैव करपंकजं ७० स्वरूपं करपद्मस्य
ज्ञात्वा गुरुमुखात्सुधीः अभिषेकपकूरानित्य महमेव सईश्वरि ७१
यदाजन्मशतांते तु जानाति करपंकजं तदेव चरमं विधियथा मंत्रस्त
थाकरः ७२ सन्निधावप्रयत्नेन स्वदेहे वर्तते करः सर्वदेवमयं पि
ठं सर्वक्षेत्रमयं परं ७३ करपंकजपीठस्य मध्ये काशी मदन्विता

७ अंगुष्ठमूले योध्याख्यावंतिका तर्जनीमुखे ७४ मथुरा मध्यमामूले
मायाख्यानामिकामुखे काचीकनिष्टिकामूले द्वारका मणिबंधके ७५
अंगुष्ठमध्ये गोकर्णं तर्जनीमध्यमे शिवे रामेश्वरं मध्यमध्ये श्रीशैल्य
पर्वतोत्तमः ७६ अविशानामिकामध्ये कनिष्टामध्यमे तथा वर्तते
हि सदाकाल हस्तिक्षत्रं महत्तरं ७७ सप्तकोटीचरं पाणौ विरूपाक्षं
तु पृष्टतः गंगा च यमुना कृष्णा कावेर्यंगुलिमध्यतः ७८ ब्रह्मेशं
पंचलिंगेशं मार्कंडेशं चिदंबर महाकालेश्वरं पंचस्वंगुष्मगे ७

षु भावयेत् ७९ सर्वमंत्रमयं पुण्यं सर्वपिटमयं परं पवित्राणां पवि
त्रं तस्माणि पंकजमर्चनं ८० यथा मंत्रेषु सर्वेषु मम पंचाक्षरः परः य-
था सर्वेषु देवेषु ब्रह्मादिष्वहमीश्वरः ८१ यथा क्रियास्तु सर्वास्तु मम पू
जागरीय यथा लापन संगेषु श्रीगुरोर्नाम मंगलं ८२ यथा मोहे
षु सर्वेषु भक्तिर्मयि परा शिवे तथा मत्पूजने श्रेष्टं पीटेषु करपंकजं ८३
यथा पुष्पेषु चद्रोणं पत्रजातेषु बिल्वजं तिलाक्षतादद्रव्यजाते यथा दुर्वास्तु
णास्तु ८४ पूजोपकरणे देवि शाक्ताशाक समंस्तवं सर्वसामग्र्य-

६ भावेपिसर्वदं करं पंकजं कोटिकोटिघटैस्तोयः पात्रस्थैरभिषेचयेत् २
६ करस्थबिंदुमात्रेण सममेवफलं ह्यो ६७ सर्वकुंभेन नाभिषिं
चेत् शतसंख्यया अन्य रूक्तोयेन सममेवफलं ह्यो ६८
नैतन्न्यूनताकिंचिन्नप्रायश्चित्तं यन्न्यूनमतिरिक्तं यज्ञानतोज्ञान
तोपिवा सांगमेवहितत्सर्वपुजनात्करपंकजे ६९ नतन्न्यूनता-
किंचिन्नप्रायश्चित्तकलमनः सकलं सांगमेवंहिपूजनात्करपंक
जे ७० यथानंमहादेविपूजामध्येतुलिंगिनः यावेल्लिंगंसमु ६

द्रासिकरपीठविधिस्त्वयं १० स्वांगं सर्वार्चनाशक्त्या अभिषेकादिकं कवि
तु यथाशक्त्यार्चनेचापिह्यर्चयकरपंकजे ११ सर्वसाधारणंचेतत्पूजनं
करपंकजे नकश्चित्तत्रदोषोस्तिलिंगसंस्थापनेर्चने १२ नपाणिपीठ
सदृशो मेरुः कैलासएववा शिवलिंगस्यपूजायां कृच्छ्रादपि भवेद्धिवै १३
तस्मात्सर्वप्रयत्नेन लिंगसंस्थापनेर्चने नपाणिपीठसदृशो मेरुः कैला-
सएववा १४ सर्वशिवमयंपाणिपद्मंसर्वोत्तमोत्तमं सहस्रनामभिः पू-
जाशक्तमष्टोत्तरेणतुवा १५ एकंवाप्यर्पयेत्पुष्पंसर्वेशाकरपंकजे आ

१ स्तीर्य विमलं वस्त्रं मृदु पाणितले शुभे १६ वामे दक्षिण हस्तेन पूजयेत्प-
त्रपुष्पकैः ताभ्यामेव हि पाणिभ्यां धत्तेमुलं कपालकं १७ यत्र करे
धृतं लिंगं तत्र स्यादतिकालिमा तादृक्ष्वाहिमसंपन्नमुदितं करपंकजं
१८ रहस्यमपि देवेशि किं भूयः श्रोतुमिच्छसि १९ इति श्री पारमेश्व-
र तंत्रे शिवाद्वैत सिद्धांते करपंकज विधान नाम त्रयोदशः पटलः १३

१

श्रीगणेशायनमः श्रीदेव्युवाच विज्ञानघनविज्ञानमयविज्ञानकारण
नमोस्तु गुरवे तुभ्यं शंभवे शशिमौलये १ सरहस्यंच पूजादौ कथितं क
रपंकजं इदानीं श्रोतु मिच्छामि लिंगलक्षणमीश्वर २ सखंडलिंगे किंपु
ण्यं पूजयेयदखंडके सखंडे सिथिले मध्ये किंवा कार्यं हि लिंगिना ३
एतत्सर्वं ममाचक्ष्व सविस्तरमुमापते यच्छ्रुत्वा जायते तस्य मतिस्थायि महे
श्वर ४ ईश्वर उवाच शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि रहस्यमपि
गोप्यं वा वक्ष्ये स्नेहवशात्तव ५ लिंगं तु द्विविधं प्रोक्तमखंडंच सखंडकं

१ सखंडं द्विविधं देवी सखंडाखंडभेदतः ६ अखंडमाद्यं यल्लिंगमखंडाकारमं
डलं अद्यंतरहितं शून्यं निराकारमनामयं ७ अरूढस्य हितल्लिंग चिदानंदघ-
नं महत् सखंडमारूरूक्षोस्तु यदीशो हृदि देवतं ८ सखंडं बाह्यलिंगं स्याल्लि
लादि द्विविधं मतं पूर्वोक्तलक्षणं लिंगं सखंडाखंडभेदतः ९ पाणिपीठं च
लिंगं च यदेकं तदखंडकं पाणिपिठं च लिंगं च यद्भिन्नं तत्सखंडकं सर्वा-
ण्येतानि लिंगानि तारतम्यार्थदानि हि अधिकारानुसारेण भक्तिरेका विशि-
ष्यते ११ यावान्हि पाणिपिठस्य भागश्चोर्ध्वमधश्च सः आयामश्चापि वि १

स्तारओन्नसं तावदेवहि १२ यावानुपरिविस्तार आयामश्चापितादृशः
तावत्प्रमाणेन नसासूत्रेस्यात्तावदेवहि ॥१३॥ यावत्पीठोर्ध्वभागं तद्विस्तारा
याममानतः लिंगंचतावदेवस्याद्विस्तारायाममानतः १४ यावदंत
र्गतंस्यत्कं पिठादुपरितद्भवेत् आधाधमंतरेस्थाप्य आष्टबंधार्थमीश्व
रि १२ आदौविधायाष्टबंधं संस्कृसे वाथदिक्षयेत् लौकिकस्यैवलिंग
स्यापाणिपीठस्यचोभयोः १८ तादृशेविगतेलिंगेदैवाद्वामानु इपिभ
प्रमादाद्वाविपक्षाद्वापुनरन्यं चधारयेत् १८ दिक्षामुखेनगुरुणाबध

२ लिंगः कुलेश्वरि यदि क्षणमलिंगः स्याद्रौरवं नरकं व्रजेत् १७ लिंगद्
यं न वै धार्यं न पूज्यं लिंगयुग्मकं दिनैकं बुद्धनैवार्च्यमकलिंगः महेयतः १८
लिंगं च पाणिपिठे च द्वयोरप्येकभावनं एकलिंगमयं कुर्याद्देकोहं शंकरोयतः
१९ षट्सूत्रमानकं पीठं त्रिसूत्रपरिसंमितं संधाय लिंगदारुर्यायद्यष्टबंधं
समाचरेत् २० पंचबंधं त्रिबंधं वा दृढयेद्देनकनवा द्रव्येण श्रेहयक्तेनशै
थिल्ये पुनराचरेत् २१ लिंगना भवेदन्यसीरप्या तथैव हि शैथिल्य
चाष्टबंधस्य यथापूर्वं समाचरेत् २२ लिंगना भवेद्दिक्षाचेकरात्रिविधानतः २

पीटनाशेतु लिंगस्यसद्योदिक्षाविधियते २३ शैथिल्येत्वष्टबंधस्यहो
मदीक्षामथान्हिकं शतमष्टोत्तरंशक्त्याभोजयेच्छिवयोगिनः २४ जपेद्द
दशसाहस्रंममपंचाक्षरिमनुं अन्यथाविपदंयातिरोरवंचाधिगच्छति
२५ लिंगनाशेभवेलिंगं पीटंपिटस्यनाशने अष्टबंधो बंधस्ययन्न
ष्टंलसुनश्चरेत् २६ लिंगाष्टबंधपीगनाभेकादीक्षाविधियते सज्जिव
स्तगुणोनांतुसद्यातमुनेराचरेत् २७ होमश्चदक्षिणादानंभोजनंशिव
योगिनां जपस्यसममेवस्यादष्टबंधादिकत्रये २८ जपादानंयथाशक्ति

भैजिनं शिवयोगिनं समभेवमहादेवि सज्जिदित्रयनाशने १९ श्रुणुतत्रविशेषं
तेप्रवक्ष्यामिमहेश्वरि जस्वार्चेन्ममनुंलिंगमशक्तःसर्वकर्मणि २० यद्यकालेष्ट
बंधस्यदेवाच्छेथिल्यमागते सद्यःसंबंधयेल्लिंगंयेनकेनापिवस्तुना २१ शनैः
संपादयेदृष्टबंधनायदटायतु नोपेक्षांतत्रकुर्वीतविमुखोहंततस्ततः २२
अप्रमत्तःसदातिष्ठल्लिंगसंरक्षणेसुधीः यथादेहेयथाप्राणेनष्टेन्यमुनराचरेत्
२३ एकदेशविभिन्नेतुयदिप्रथमलिंगकं यावच्छिष्टंहितत्तावद्यावत्तावच्चरे
च्छिवे २४ द्वितीयादिलिंगेषुचैकस्यन्यत्समाचरेत् लिंगीशिवभक्तानांस

द्याद्दीक्षांत्वभोजनं ३५ पात्रनाशे ह्यवेसात्रं यन्नष्टं तसुनश्चरेत् वक्ष्ये शृणु महा
देवी प्रसंगात्पात्रलक्षणं ३६ सौवर्णं राजतं कांस्यं ताम्रं पैत्तकं तु वा दारुजं मृण्मयं ल
शैलं पर्णजं नारिकेलजं ३७ अभिन्नं विपुलं क्षणं वर्तुलं नवमुज्वलं निर्म-
लं पंकरहितं सुगंधि लघुशोभितं ३८ तानि दशाणि पात्राणि नव सप्तापि पंचवा
अथवा त्रिणि कुर्वित नैकं न समसंख्यया ३९ दरिद्रोपि न कुर्वीत नसी सं नायसत्र
पु अपात्रबहुपात्राणी वर्जयेच्छिवपूजने ४० संकल्पसाधितं पात्रं न निमित्तं विना
तथा चालयेत्पूजने कालेन स्कनं कारयेज्जलं ४१ संभवे सति सौवर्णपात्रं स्यादु

४ चमोत्तमं अभावे राजतं लोहं मृत्स्वर्णादिनु शक्तितः ४२ सर्वसाधारणं देवि
नारिकेलशिवार्चने अयुर्यशोबलकरमपमृत्युनिवारकं ४३ सम्यक्संक्षा
लयेन्नित्यं नान्यकर्मणि योजयेत् विनैव पूजां लिंगस्य शिवपात्रं तदुच्यते ४४
पात्रेषु सागरान् सप्त गंगा गोदावरीं नदीं कृष्णां वेणीं तुंगभद्रां कावेरींच
पिनाकिनीं ४५ ताम्रपर्णीं तथा रेवां यच्च पुष्करणीत्रयं मणिकर्णिकं
धनुष्कोटिं भावयेत्पात्रमध्यगां ४६ न भूमौ प्रक्षिपेत्पात्रं न च रिक्तं क
दाचनं नान्योन्यताडयित्वा तु जनयेद्ध्वनिमीश्वरि ४७ संसाधयेत्त- ४

यत्नेन पात्राणामःधरं भुवि आधाराणि स्युर्योग्यानि पात्रनिक्षेपणाय हि ४८
अभिषेकाय लिंगस्य यदि स्यादुद्धृतोदकं तदोदकुंभमपि वानाधारं निक्षिपे-
द्दिना ४९ यद्यंतराभवेद्दव्यं का पाणिलिंगस्य लिंगिनः पूजायां देहधर्मस्य
शिष्यपाणितले क्षिपेत् ५० शिष्याद्यभावे देवेशि सज्जिकायां पुनः क्षिपेत्
निवर्तयित्वा निर्वर्त्य सचैलं स्नानमाचरेत् ५१ पुनः कुर्याद्यथापूर्वं पूजाशे-
षंममप्रिये अन्यथा पतितो याति दारुणं नरकार्णवं ५२ नाशुचिः पूजयेल्लिं-
गं नाकाले नान्यविमनाः नानादरेण हस्ताज्ञे पूजायां विधिरुच्यते ५३

१ धृतरुद्राक्षभस्मांगः शिवनामपरायणः गुरूक्तेनविधानेनप्रयतोलिंगमर्चयेत् ९४ नान्यकार्यपरः क्वापिनप्रलापपरोपिवा नच्यग्रोवानवस्त्यापूजयेल्लिंगमीश्वरी ९५ संतुष्टमानसः शांतः शुचिमाल्यांबरावृतः सुवासितमुखोभूत्वापूजयेल्लिंगमीश्वरि ९६ सद्यापूर्वमुखःपूजांकुर्याल्लिंगस्यशांकरि आयुःश्रियंयशोवर्चःप्रजापुष्टिंयदीच्छति ९७ दक्षिणादिङ्मुखः कुर्यान्मारणादिषुसुंदरि कामार्थिःपश्चिममुखोज्ञानार्थिःश्रीदुदङ्मुखः ९८ प्रातर्मध्यान्हयोःपूर्वमुखःपूजांसमाचरेत् रात्रानु १

दङ्मुखः कुर्याद्विधिरेवमभार्चने ५९ व्यस्तं नैव कुर्वीत विनैहिकफलं
वे यदि स्याज्ज्ञानमोक्षार्थी पूजयेदुत्तराननः ६० निस्पृहः सर्वकामेषु मुमु
क्षुर्विजितेंद्रियः उक्तलक्षणवान्ज्ञानी सर्वस्य सर्वदा भवेत् ६१ तेज-
स्कामोग्निवदनः प्रजाकामी मरुन्मुखः शत्रुक्षयादीश्वरास्यः प्रजार्थि प्रस्गुत
र: ६२ संध्यासु पूर्ववदने अभिचारककर्मा अर्चन्निरृतिदिग्वक्त्रः स
र्वा सर्वतोमुखः ६३ ईत्यादिनियमोपेत आस्तिको भक्तिमान्मयि गुरु
दैवतयोरेकरूपं प्रत्ययवान भवेत् ६४ प्रायश्चित्तेपि वैकस्मिन्निषेधेपि विधाव
पि

६ कार्येप्यकार्यसर्वत्रगुरुरेवहिकारणं ६५ सन्निधावपिदूरेवा वधाने
समक्षकः गुरुन्नत्येवनियमोयतःसर्वात्मकोगुरुः ६६ ब्रह्माविष्णुः
शिवारुद्रःइशःशक्तिःपितामह सूर्यचंद्राग्निमरुतागुरुरेवनशंशयः ६७
उत्थानेशयनेकापिप्रध्यानेचोपवेशने निद्रादौचतदंतेच स्मरेत्सर्वत्रसद्गु
रू ६८ वचनारंभसमयेक्षुतप्रसवरुनादिषु विकथनेचकलहे स्मरेत्सर्व
त्रसद्गुरू ६९ सर्वपापविनाशाय सर्वसौख्यवि ये सर्वाभिष्टार्थसि
ध्यर्थसंस्मरेच्छ्रीगुरुंसदा ७० ब्रह्महत्यासहस्राणिगोहत्याकोटिकोटि ६

साधितान्यपिधीपूर्वश्रीगुरुमूंस्मरणंदहेत् ७१ दुःस्वप्नेपिदुरालोपेदुश्चि-
न्तेदुर्भयेपिच दुर्नीयेच क्लेषसंस्मरेत्श्रीगुरुंसदा ७२ पवित्रंपावनंपु-
ण्यंशुद्धंपरममंगलं वेदवदांतसारार्थश्रीगुरोर्नामसंस्मरेत् ७३ अ
शास्त्रेणापिशास्त्रेवानाचाराचारयोरपी सर्वदोषविनाशायश्रीगुरोःस्मरणंप
रं ७४ विद्याज्ञानविवेकायसुखभोगार्थसिध्दये जीन्मुक्तयर्थलाभायकु
र्यात्संस्मरणंगुरोः ७५ कृतानांसर्वपापानांमनोवाक्कायकर्मभिः सद्य
वविनाशायसं त्गुरुमात्स्मरात् ७६ नविनस्यंतिपापानिजाग्रत्स्वप्नादिकृ

७ तान्यपि अनस्थान्यपिचास्थानि श्रीगुरूस्मरणंविना ७७ यद्यस्तिमयि
सद्भक्तिः साधकश्यच लिंगिनः मद्भावणामुमेनित्यंसंस्मरेत् श्रीगुरुंसुधीः
७८ पुषसिब्रह्मसद्रूपंचिद्रूपंपरमामृतं चिदानंदघनंदेवंसर्वदाश्रीगुरूंस्म
रेत् ७९ सर्वेषामपिकार्याणामारंभेयतमानसः अप्रमत्तःस्मरेन्नित्यंश्रीगु
रोर्नाममंगलं ८० गुरूभक्तिविहीनस्यसमस्तानिष्फलाःक्रियाः अनुष्ठि
ता अपिसृष्टंस्वैरिणिव्रतवद्धिवे ८१ बहुनाकिमुनानार्येसर्वसारमिदंश्रुणु
सर्वकैवल्यमाकल्पंपूर्त्त्येयेपरमंवचः ८२ स्वस्थःपरवशोवापितुष्टोवादुखि ७

तापिवा सर्वावस्थासु सर्वत्र गतिः सद्गुरू सेवनं ९३ अशक्तः पुजने भ
क्त उक्त लक्षण कर्म ही सर्वसाकल्यशिध्यर्थं ध्यायेद्गुरू पदांबुजं ९४ मंत्र
मुळं गुरोर्वाक्यं पुजा मुलं गुरोःपदं ध्यान मूलं गुरुमुर्ति मोक्षमुलं गुरोः कृपा
९५ यस्त्वशक्तो मम ध्याने स ध्यायेद्गुमि रं जपमंत्रस्यमेदेवि श्रीगुरोर्ना
मसंस्मरेत ९६ सर्वमंत्रमयं दिव्यं सर्वशास्त्रमयंशुभं सर्वदेवात्मकं पुण्यं
श्रीगुरोर्नाममंगलं ९७ यद्रासाक्षाद्गुरोरर्पं भक्तः पश्यति पुण्यवान्
तदेव मम देवेशि साक्षाद्दर्शनमुत्तमं ९८ तस्मात्स्वर्गापवर्गेच्छुरिह भोगे

६

द्गुरास्तिकः सर्वदासर्वयत्नेन गुरुदेवंसमाश्रयेत् ८९ सर्ववेदाश्चशा
स्त्राणि पुराणानिचसंहिताः स्मृतयोधर्मशास्त्राणि श्रीगुरोर्वचनंपरं
९० गुकारोधलमः प्रोक्तं रुकारोभास्करोदयः मोहांधकारहरणाद्गुरि
त्यभिधीयते ९१ सप्तकोटिमहामंत्रा चित्तविभ्रमकारकाः एकएवम
हामंत्रो गुरुरित्यक्षरद्वयं ९२ द्वावेवमंत्रौदेवेशि सर्वेषामपिमुक्तये
सर्वक्लेशविनाशाय गुरुरितिशिवेतिच ९३ भावयेत्सततंधीमानज्ज
गद्रक्तचराचरं इंद्रियापगतं यद्यत् श्रीगुरोरूपमेश्वरं ९४ गुरुयात्रा ६

सदाकाशीयात्रात्तस्यप्रदक्षिणां भुमिप्रदक्षिणंसाक्षाद्दर्शनंममसुव्रते
९८ इसतकथितंदेविसर्वसारमनुत्तमं रहास्यमासरक्षंर्थिकिंभुयःश्रो
तुमिच्छसि ९९ इतिश्रीपारमेश्वरतंत्रेअष्टबंधादिगुरुनिरुपणनामच
तुर्दशःपटलः १४

श्रीगणेशायनमः श्रीदेव्युवाच सृष्ट्वा त्वमेकं स्वात्मानमनेकं कुरुते पुनः एकीकृत्य
महसनियस्तस्मै रुद्र नमोस्तु ते १ सर्वदृक् सर्वकृत्स्वामिन् सर्वात्मन् सर्वपालकं शर्वस
वज्ञ विश्वेश शरण्याय नमो नमः २ कृपया मपि वासत्स्यवशेन कथितं प्रभो वीरशैवस्य-
थिस्तारं वैभवं तु सविस्त ३ इतः परं माया वक्ष्यमस्त्यं वा नास्ति मे मतः तथापि मम-
चित्तस्य पर्याप्तिर्नैव जायते ४ अस्ति चेदुपदेशं मे रहस्यं चाप्रकाशकं गुप्तं वा प्रकटं वापि
दयां मयि निर्देशय ५ यदि दास्यस्यनुज्ञां मे पृच्छाम्यागमतस्पृहां पृष्टव्यमस्त्येव मम व
र्तते हृदि संशयः ६ श्रीईश्वरउवाच साधु साध्वि वरारोहे पृच्छ त्वमपिशंकिता तवा

२ वाच्यमितः किं मेवत: किमधिकं मम ७ यदीच्छसि मतं श्रोतुं ईति गुह्यतमं तुवा लवस्ने
हे न वक्ष्यामि श्रुत्वा धारमगोम ८ श्रीदेव्युवाच सरहस्यमुपादिष्टं वीरशैवाभिधं मितं
अन्यानि वादिशैवादिष्वनुपूर्वेणमे प्रभो ९ इयानेव विशेषोत्र यदुक्तं पूर्वमध्यमे यद्यस्ति-
वा विशेषोत्र तारतम्येन वा क्वचित् १० अस्ति चेदपि भेदो वा तारतम्येन वा समः तत्रत
त्र विशेषो वा को वा वद महेश्वर ११ अथैषां कोनुवाचारो वीरशैवेपि नान्यतः वीरशै-
वेषु वादेव विशेषो मम कथ्यतां १२ वीरशैवविभेदेषु स्थितानामाधिकारिणां दै-
वाद्वा बुध्वितो चापि लिंगादीनां विनाशने १३ पूर्वोक्त एवं वा मीषां विभेदेषु विशेषतः २

लिंगादिनाशे पीटानां वीराणां वद मे हर १४ ईश्वर उवाच साधु साध्वि समीचीनः
प्रश्नो त्रिभुवनेश्वरि लोकोपकाराय कृतः शृणु वक्ष्यामि कृत्स्नशः १५ यदि त्वया
त्र देवेशि न कृतः प्रश्न ईदृशः भ्रश्येयुर्वीरशैवस्य शास्त्ररहस्यविवेककृतः १६ रहस्यं
विदितं देवि त्वया परममंगले अयत्नयो भ्रताः सर्वे वीरशैवमतेश्वराः १७ अन्य
देवांधकूपेषु पतंति कुधिमः शिवे अज्ञात्वा मन्मते सारं रहस्यं परमा नः १८ वीर
शैवमहाभूलखाते न पतिता आमी देवि त्वप्रश्ननिश्रेण्याप्रोद्धृताः सुखमेधमे १९ य
द्वाजालगतः पक्षी निर्गतो नेजालसुमनः बहिर्द्वारमजानानो म्रियते च यथा शिवे २०

२

वीरभेदानविज्ञायहठाद्वीरमहा दे निपत्यदुःखेः क्लिश्यंतिशून्यकूपगताइव २१

नसाधुबद्गुशैवंतेगुरुंमद्गुपिणंशिवे नजानंतिततःसाधुपृष्ठ्वामतरहस्यकं २२ नाज्ञः

ज्ञः पारमान्यातिनाप्रज्ञःसुखमेधते नरुज्यद्गुरुसेवायांनालाथश्चाप्यपृच्छकः २३

प्राणार्थमानवस्कभिःगुरुसूश्रूषणोत्सुकः साधयेदात्मनोभिष्टंगुरोरेवमदात्मनः २४

किंचिज्ज्ञादांभिकाभ्रष्टागुरुसेवाभिमानिनः वीरशैवंनजानंतिशठाःपंडितमानिनः

२५ अन्यस्मैबोधयंतिस्मसर्वज्ञत्वंपरंखलाः नाचरंतिस्वयंकिंचिदधस्तेनिपतंति

हि २६ नतःसम्यग्गुरुसुखाच्छास्त्रमूलंविचारयेत् नवेशैदमम्तोथह्यवीक्ष्यास्व

२

लाबले २७ अथश्रुणुमहादेवि वीरशैवमतेमम विशेषमपिचारंयथावत्कथयामि
ते २८ यदुक्तमादिशैवादि वीरशैवांतमीश्वरी नतत्थाविषेषोत्रभेदषट्कपिपूर्वके
२९ वीरशैवेविशेषोस्तिसावधानमतिःश्रुणु यस्यविज्ञानमात्रेणजायतेयंसदाशिवः
३० त्रिविधंवीरशैवागस्यमधिकारिविभेदतः कृतंमयापुरादेवीभक्तोध्दरणहेतवे
३१ सामान्यवीरशैवंचविशेषंचततःपरं निराभारवीरशैवंनततोधिकमेश्वरि ३२
मतफलविशेषोवाभेदोवावीरशैवके अत्रोच्यतेमयायोर्थःपरमार्थःसर्वशिवे ३३
समान्यवीरशैवंचतत्रदेविपुरोदितं आचारश्चविधिर्देवीपूर्वमेवोदितःमया ३४ सर्वं

३ भूतदयां हिंसाशमो दमउदाहृताः विविक्तानापेक्षभक्तिरद्वंद्वंममपूजनं ३५ स्मरणं
कीर्तनंध्यानंमद्भावपरिशीलनं मद्भक्तेषुपराभक्तिर्मदेकात्म्यममायया ३६ गुरोःशुश्रु
षणंभक्त्यामतभेदेनसर्वदा त्रिकालमर्चालिंगस्याहिंसयाभक्षजीवनं ३७ ईत्यादि-
निपुरोक्तानि पराण्यंगानितस्यतत् सामान्यवीरशैवस्यालिंगिनोवीरयोगिनः ३८
भिक्षाटणमेकगृहे भिक्षांवा भक्तितोयदि ददातिसार्थयन्भक्तोभुंजियात्तदनुग्रहात
३९ ग्राममेवायदिवारण्यमनोयत्रप्रसीदति तत्रैवचसुखंध्यायेत्मद्रूपमपिवागुरुं ४०
लिंगादिनाशादेवाद्याधारयेद्दिविधितःपुनः यथानव्रतलोपःस्यात्तथासाध्यंमतंमम
४१। ३

सामान्यवीरशैवस्यमतस्यागतमीईश्वरि अथवक्ष्येधीकारार्थवीरशैवमतंपरं ४२ वीर
शैवमतस्थस्यग्रामाद्बहिरवस्थितिः भैक्ष्यार्थंप्रविशेत्ग्रामेग्रामेनिद्रांनचाचरेत् ४३
नसेवेतस्त्रियंक्वापिनस्त्रीसंगीषुसंगमं नग्राम्यवार्तांशृण्वीतनसंगंप्राकृतंचरेत् ४४
प्रवेशेनेपिनासानंभिक्षार्थंसमयेगृहे प्रकाशयेत्स्वयंमौनीशंखघंटादिभिःस्फुटं ४५ भैक्ष्या
र्थंगृहमाविश्ययदिभैक्ष्यंनलभ्यते ननिर्विशेद्धिनिर्गत्यंद्विवारंतम्दहेपुनः ४६ मौनीनि
अ यतचेष्टस्यात्तिरोर्धंनुस्मतां नासनक्लेशजननमाचरेदर्थविश्रमात् ४७ पूजाध्या
नंतुमस्मरणमानिहाक्रमलोभता व्रतानिविरशैवस्यसत्यंप्राणिदयाशिवे ४८ लिंगादि

ज्ञाशादेवेन धारयेद्विधिवत्पुनः यद्यशक्ताधिकारस्य तदूर्ध्वगतधर्मिणः ४९
भक्तस्य नष्टलिंगस्य वीरवीरव्रतात्मनः विभायेत्स्यकं देहं लिंगरूपात्मकं ५० भै
क्षेणवर्ततेनित्यं संगृहं नहि लिंगिनः मौनी ध्यानपरास्तिष्ट कांते निर्जनेविके
५१ विशेषवीरशैवस्थः समाधायमनो मुनिः प्राप्याधिकारान्निविशेदेरवीरमते
मम ५२ अन्यथाभ्रस्यते देवि दुष्करत्वान्मदासनः वीरवीरमतस्थस्य भक्तस्य
ममज्ञांकरि ५३ अथाधिकारी गत्वैतमतं ममम हत्तरं तुर्यवीरमहाशैवमप्रमत्तो
वशेसदा ५४ वनएववसेन्नित्यंमजनग्रामसंगतिः नविशन्नगरंग्रामंगृहं